Barcode : 1990020047488
Title - Mimamsa Koustubha vol.3 part 1
Author - Khandadeva
Language - sanskrit
Pages - 106
Publication Year - 1932
Barcode EAN.UCC-13
1 990020 047488

June

THE

CHOWKHAMBA SANSKRIT SERIES

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS

NO. 402.

मीमांसाकौस्तुभः।

(मीमांसासूत्रोपरि काचन विस्तृता टीका)

(प्रथमाध्यायस्य द्वितीयः पादः।)

पूर्वोत्तरमीमांसापारावारपारीण-

श्रीखण्डदेवविरचितः

श्रीकाशीहिन्दूविश्वविद्यालयमीमांसाप्रधानाध्यापकेन

वेदविशारदबिरुदभाजा

पं० अ. चिन्नस्वामिशास्त्रिणा

तच्छिष्येण श्रीपट्टाभिरामशर्मणा मीमांसा शास्त्रिणा च

संशोधितः श्रीजयकृष्णदासगुप्तेन मुद्रापितो विजयताम्।

MIMAMSAKAUSTUBHA

[An exhaustive Commentary of Jaiminisutras]

(II Pada of I Adhyaya)

BY

KHANDADEVA.

Edited by

"VedaVisarada" Pandit A. Chinnaswami Sastri,

Chief Professor of Mimamsa. Benares Hindu University

and his pupil Sri Pattabhirama Sarma M S.

Vol. III. FASCICULUS I–१.

PUBLISHED & SOLD BY THE SECRETARY,

CHOWKHAMBA SANSKRIT SERIES OFFICE,

Vidya Vilas Press, North of Gopal Mandir, Benares.

1931

Registered According to Act XXV of 1867 (All Rights Reserved.)

श्रीः

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ।
सुवर्णाऽङ्कितभव्याभशतपत्रपरिष्कृता ॥ १ ॥
चौखम्बा-संस्कृतग्रन्थमाला मञ्जुलदर्शना ।
रसिकालिकुलं कुर्यादमन्दाऽऽमोदमोहितम् ॥ २ ॥

स्तवकः—४०२

Printed by Jai Krishna Das Gupta
at the Vidya Vilas Press, Benares,

श्रीः ॥

नमश्शिवाभ्याम् ॥

श्रीखण्डदेवविरचितः

॥ मीमांसाकौस्तुभः ॥

प्रथमाध्याये द्वितीयः पादः ॥ (अर्थवादपादः)

(प्रथममर्थवादप्रामाण्याधिकरणम्)

विघ्नध्वान्तनिवारणैकतरणिर्भक्तैकचिन्तामणि-
र्विद्याकाननगाहनैकसरणिर्मच्चित्तभूषामणिः ।
भूयादेष कुतर्ककर्कशधियां हर्ताऽपहर्ता तथा
मोहानां सुधियां सदैव सविता कात्यायनीशात्मजः ॥ १ ॥
बृन्दाविपिनविहारी गिरिवरधारी स्वकीयसुखकारी ।
मच्चित्तरङ्गचारी भूयान्नृत्याप्रियः कृष्णः ॥ २ ॥
शश्वद्बोधतरङ्गा विद्यागङ्गोत्तमाङ्गे यस्य ।
श्रीरुद्रदेवसंज्ञं जनकं वन्दे सदा स्फूर्त्यै ॥ ३ ॥

सूत्रम्—आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते ॥ १-२-१. ॥ (पू)

(विषयसंशयौ)

अत्र “(१)सोऽरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वम्”

१. तै. सं. १-५-१. पुरा कदाचित् देवा असुरैस्साकं युयुत्सवः कदाचिदस्माकं पराजये जीवनार्थमिदं भविष्यतीति मन्वानाः स्वनिकटस्थममूल्यं वस्तुजातमग्नौ निधाय योद्धुमगच्छन् । तत दृष्ट्वा लो-

"(१)वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयति" इत्यादयोऽर्थवादा धर्माधर्मयोः प्रमाणं नवेति सन्देहः ।

(सङ्गतिः)

अत्र लक्षणसङ्गतिर्धर्माधर्मयोः प्रमाणनिरूपणात् सुलभैव । (२)यस्यापि मते वेदप्रामाण्यनिरूपणमध्यायार्थः, तस्याप्यस्मिन्नधिकरणे तावत्सङ्गतिस्सुलभैव । पादसमनन्तरसङ्गतिस्तु विध्यतिरिक्तवेदवाक्यप्रामाण्यनिरूपणात् स्पष्टा । नामधेयस्य च विध्यन्तर्भावस्य वक्ष्यमाणत्वान्नातिप्रसङ्गः । वाक्यपदेन वा पदरूपस्य नामधेयादेर्निरासः । अनन्तरसङ्गतिरपि पूर्वाधिकरणे विध्यर्थमपि निरूपितेऽपौरुषेयत्वे कर्तृस्मरणाभावरूपयुक्तिसाम्यादर्थवादेषु प्रसक्ते तद्वदेव धर्मप्रमोत्पादकत्वमस्ति ? नवा ? इति विचाराद्द्रष्टव्या ॥

(पूर्वपक्षः)

तत्राप्रमाणं धर्माधर्मयोरर्थवादा इति पूर्वः पक्षः । तथाहि-एते किं स्वातन्त्र्येण तयोः प्रमाणम् ? विध्येकवाक्यत्वेन वा ?

भाकृष्टचित्तोऽग्निः तैर्वस्तुभिस्साकं पलायते स्म । युद्धे जयं प्राप्य प्रतिनिवृत्ता देवा अग्निमपश्यन्तस्तमन्विष्य क्वचित् लब्ध्वा स्वीयानि वस्तूनि ततोऽगृह्णन् इति पूर्वसन्दर्भः । एवं गृहीतः सोऽग्निः अरोदीत् । यस्मादरुदत् तस्मात् तस्य रुद्रत्वम् , इति प्रकृतवाक्यार्थः ।

१. तै. सं. २-१-१. "वायव्यं श्वेतमालभेत भूतिकामः" इति विधिसन्निधिपठितोऽयमर्थवादः। वायुः क्षेपिष्ठा क्षिप्रगामिनी देवता । वैशब्दः प्रसिद्धौ । स्वेन भागधेयेन स्वसम्बन्धिना श्वेतपशुरूपेण हविषा यजमानस्तं प्रीणयति यदि स वायुः एनं यजमानं भूतिं प्रापयत्येवेत्यर्थः

२. प्राभाकरमतमिदम् ।

आद्येऽपि किं स्वशक्त्या ? (१)लक्षणाध्याहारादिभिर्वा ? नाद्यः; सदसद्रूपसिद्धार्थबोधकत्वेन धर्माधर्मबोधानुत्पादनात् । न द्वितीयः; लक्षणादिकं हि तात्पर्यानुपपत्त्या वा स्यात्,? अन्वयानुपपत्त्या वा ? न तावत्तात्पर्यानुपपत्तिः; धर्माधर्मतात्पर्यकत्वस्य प्रमाणान्तरेणासिद्धेः । न चाध्ययनविधिनैवार्थज्ञानार्थत्वेनाध्ययनं विदधता निष्प्रयोजनार्थज्ञानस्य भाव्यत्वानुपपत्तेः प्रयोजनवदर्थज्ञानार्थत्वमध्ययनस्य बोधयता अर्थवादानां धर्माधर्मयोस्तात्पर्यमवगम्यते । अतश्च स्वरसतस्तेषां विधिवत्तदनवाप्तेः लक्षणासिद्धिरिति वाच्यम् । अर्थज्ञानार्थत्वमध्ययनस्य लोकत एव सिद्धमिति तदंशे विधिवैफल्यात् । न चार्थज्ञाने उपायान्तरस्यापि पक्षे प्राप्तत्वादध्ययननियमांशे विधेरर्थवत्तास्त्विति वाच्यम् । नियमस्याप्यध्ययने तत्कार्ये वाऽर्थज्ञानेऽनुपयोगेन विधिवैयर्थ्यात् । न चावघातादिनियमवदपूर्वसाधनत्वो-

---

१. अध्याहारोऽश्रुताक्षेपो व्यत्यासो व्यवधिः पदैः । मतो विपरिणामोऽसौ प्रकृतिप्रत्ययान्यथा । वाक्यान्यथात्वकरणं व्यवधारणकल्पना । इति प्राचां सङ्ग्रहश्लोकस्सार्धः । तत्राध्याहारस्योदाहरणम्–विश्वजिता यजेतेति । अत्र स्वर्गकामपदाध्याहारः ॥ अश्रुताक्षेपस्योदाहरणम्–भाट्टमते शब्दादप्रतीतस्याप्यपूर्वस्याक्षेपः ॥ 'उपहूत उपह्वयस्व' इत्यत्र क्रमवैपरीत्येन पूर्वभागस्य सोमभक्षणार्थमाज्ञाप्रश्ने उत्तरभागस्याज्ञादाने विनियोगः । पदव्यवधानोदाहरणम्— "प्रतितिष्ठन्ति ह वा य एता रात्रीरुपयन्ति" इत्यत्र ये प्रतितिष्ठन्ति प्रतिष्ठासन्ति ते एता रात्रीरुपयन्ति उपेयुः इति यच्छब्दस्य व्यवहितेन प्रतितिष्ठन्तिपदेनान्वयः ॥ विपरिणामस्याप्येतदेवोदाहरणम्, 'प्रतितिष्ठन्ति' 'उपयन्ति' इत्यनयोः प्रतितिष्ठासन्ति, उपेयुः इति विपरिणामात् ॥ व्यवधारकल्पना तु–यावतोऽश्वान् प्रतिगृह्णीयात् तावतो वारुणान् चतुष्कपालान् निर्वपेत्" इत्यत्र । अत्र हि उपक्रमे दातुरेवं प्रजापतेरिष्टिकरणावगमात् तदनुरोधेन प्रतिगृह्णीयात्' इत्यस्य दानार्थकता कल्प्यते ॥ लक्षणा तु सिद्धान्तिनोक्तैव ॥

पयोगादर्थवत्ता । अध्ययनविधेरनारभ्याधीतत्वेन प्रकरणादपूर्वसाधनत्वानुपस्थितेः ।

न च(१) पर्णतादाविवाव्यभिचरितक्रतुसम्बन्धात्तदुपस्थानम्, अर्थज्ञानस्य क्रतुं विनाऽप्यध्यापनादिद्वारा द्रव्यार्जनोपयोगसम्भवेन व्यभिचारात् ।

न च नियमस्य पुरुषार्थत्वकल्पनया स्वर्गार्थं पापक्षयार्थं वा विधिरर्थवानस्त्विति वाच्यम्, एवमप्यध्ययनविधेरर्थज्ञानार्थत्वेनाध्ययनविधाने व्यापारोऽस्ति ? न वा ? आद्ये विध्यानर्थक्यम् । अन्त्ये अर्थवादानां प्रयोजनवदर्थतात्पर्यकत्वस्याध्ययनविध्यधीनत्वाभावान्न तल्लक्षणासिद्धिः ।

एतेन "अनधीयाना व्रात्या भवन्ती" तिवचनादध्ययनाकरणे प्रत्यवायावगतावपि भावनाया भाव्यापेक्षायां दृष्टत्वात्प्रयोजनवदर्थज्ञानमेव भाव्यत्वेनाध्ययनविधिस्स्वीकरोतीत्यपास्तम् । अध्ययनविधेरर्थज्ञानभाव्यकत्वे तात्पर्यस्वीकारे लोकसिद्धत्वाद्विध्यानर्थक्यम् । अस्वीकारे भावनाया लोकदृष्टनान्तरीयकतया अर्थज्ञाने भाव्यतया सम्बध्यमानेऽप्यर्थवादकृतं भूतार्थज्ञानमेव भाव्यतया सम्बध्येत, न प्रयोजनवदर्थज्ञानम्; विधितात्पर्याभावात् । अतश्च लक्षणाया असिद्धिस्तदवस्थैव ।

किञ्च सत्यामपि लक्षणादिसिद्धौ अनेकेष्वर्थवादेषु लक्षणाद्यपेक्षयाऽध्ययनविधेरेकैकस्य अदृष्टार्थत्वकल्पनोचिता । आवश्यकं चाध्ययनविधेरदृष्टार्थत्वं (२)हुंफडाद्यध्ययनांशे । अत एवावैरूप्यादर्थवादांशेऽप्यदृष्टार्थत्वमेव कल्प्यम् ।

---

१ 'यस्य पर्णमयी जुहूर्भवति न स पापꣳ श्लोकꣳ शृणोति' इति वाक्यविहितपलाशवृक्षीयत्वादिवदित्यर्थः ।

२ हुंफडादीनामर्थाभावादिति भावः ।

न चैवं विध्यध्ययनस्याप्यदृष्टार्थत्वापत्तेस्तेषां धर्मे प्रामाण्यानापत्तिः, तदध्ययनस्यादृष्टार्थत्वेऽपि स्वशक्त्यैव विधीनां प्रयोजनवदर्थप्रमापकत्वरूपप्रामाण्योपपत्तेः । अतोऽध्ययनविधिस्स्वर्गार्थं पापक्षयार्थमेव वाऽध्ययनं विधत्ते, यथाश्रुतार्थज्ञानार्थं वा। अध्ययनमेव वा समानपदोपात्तत्वात् भावनाभाव्यमस्तु । न चैवमन्त्यपक्षद्वये प्रवृत्त्यनुपपत्तिः, अपुरुषार्थत्वादिति वाच्यम् । "अनधीयाना" इति वाक्येनाकरणे प्रत्यवायबोधनादेव प्रवृत्तिसिद्धेः । एवंच सर्वथा नाध्ययनविधिस्तात्पर्यग्राहक इति सिद्धम् । तस्मान्न तावत्तात्पर्यानुपपत्तिर्लक्षणाबीजम् ।

नाप्यन्वयानुपपत्तिः । "वायुर्वै क्षेपिष्ठे" त्यादिपदार्थान्वयस्योपपन्नतरत्वात् । यद्यपि "ग्रावाणः प्लवन्ते" "(१)यजमानः प्रस्तर" इत्यादिष्वन्वयानुपपत्तिर्धर्माधर्मलक्षणाबीजं शक्यते वक्तुम्, तथापि धर्माधर्मयोर्निर्धारणाभावः । ग्रावाणोऽपि प्लवन्ते अतोऽन्येन चेतनेन प्लवितव्यम्, अथ वा ग्रावाणोऽपि मूर्खा यत्र प्लवन्ते तत्राऽन्येन जानता कथं प्लवितव्यमिति । यदि तु निषेधकल्पनातो विधिकल्पनायां लाघवं नियामकं शंक्येत, ततो "(२)न बाहुभ्यां नदीं तरे" दित्यादिशास्त्रविरोधो वक्ष्यमाणो दुष्परिहरः । तस्मादुभयथापि स्वातन्त्र्यपक्षोऽयुक्तः ।

अथ विधिनिषेधैकवाक्यताबलेन प्राशस्त्याप्राशस्त्यलक्षणया प्रामाण्यमुच्यते, ततो वाक्यस्वारस्येन भिन्नवाक्यत्वप्रतीतेर्नैकवाक्यत्व एव प्रमाणं पश्यामः । नचान्यत् प्राशस्त्याप्राशस्त्यलक्षणायां प्रमाणमस्ति । अध्ययनविध्यदृष्टार्थत्वस्य स्थापितत्वात् ।

किञ्च किमिदं प्राशस्त्यमप्राशस्त्यं वा? तद्धि गुणवत्त्वं दो-

---

१ तै. सं. १.७.४. प्रस्तरो दर्भमुष्टि विशेषः। २ मनुस्मृ. ४.७.

षवत्त्वं वा तच्छब्दवाच्यत्वेन लोके प्रसिद्धम्, तद्यदि विधिनिषेधविषयत्वम्, इष्टानिष्टफलकत्वविशिष्टेतिकर्तव्यताकत्वं वा गुणदोषवत्त्वम्? तदन्यतस्सिद्धत्वान्नार्थवादापेक्षम्। न च स्तुतिनिन्दयोर्विधिनिषेधोपकारकत्वं सम्भवति, ताश्च इच्छानिच्छोत्पादकत्वेन वा स्यात्? प्रवृत्तिनिवृत्तिप्रतिबन्धकालस्योत्साहनिवर्तकत्वेन वा? नाद्यः; विधिनिषेधाक्षिप्तेष्टानिष्टमूलकत्वादेव तत्सिद्धेः। नान्त्यः; प्रवृत्तिनिवृत्तिहेतुभूताविधिनिषेधाभ्यामेव तत्सिद्धेः। एतेन साक्षात्प्रवृत्तिहेतुत्वं प्रत्युक्तम्। अर्थवादोपात्तस्तुतिनिन्दाभ्यामेव तत्सिद्धेः विधिनिषेधवैयर्थ्यशङ्का तु अर्थवादेभ्यस्स्वरसतस्स्तुतिनिन्दयोरप्रतीतेः अध्ययनविधिवशेन च प्रयोजनवत्त्वावगमेऽपि स्तुतिनिन्दालक्षकत्व एव प्रमाणाभावान्निराकर्तव्या।

किञ्च सत्यपि विधेः प्राशस्त्यापेक्षत्वे निरर्थवादकविधौ विधेरेव प्राशस्त्यप्रतिपादने दृष्टशक्तिकस्य प्राशस्त्यपरत्वोपपत्तौ नादृष्टशक्तिकार्थवादापेक्षणं युक्तम्। एवंचानपेक्षितत्वादयोग्यत्वाच्च विद्यमानोऽपि सान्निधिर्नैकवाक्यत्वकारणमिति न धर्माधर्मयोः प्रमाणमर्थवादाः। न च धर्माधर्मयोः प्रामाण्यसम्भवः; वायुक्षेपिष्ठत्वादीनां मानान्तरप्राप्तत्वेनानधिगतार्थगन्तृत्वरूपमुख्यप्रामाण्यासम्भवात्। 'ग्रावाणः प्लवन्त' इत्यादौ याथार्थ्यलक्षणस्याप्यसम्भवाच्च। तस्मादप्रमाणमर्थवादाः॥

सूत्रं तु आम्नायस्य(१)तद्भूताधिकरणे अंशत्रयविशिष्टभावनारूपक्रियाप्रतिपादकत्वेन प्रामाण्यस्य स्थापितत्वात्, अतत्प्रतिपादकानामर्थवादानां, आनर्थक्यम् प्रयोजनवदर्थराहित्यम्। तस्मादप्रमाणमेवंजातीयकमर्थवादजातमिति व्याख्येयम्॥

यत्तु मूले आदावर्थवादमन्त्रनामधेयानां त्रयाणां सामान्य-

१ पू. मी. १-१-७.

तोऽप्रामाण्यपूर्वपक्षं कृत्वा तथैव सिद्धान्तसूत्रे निराकरणं कृतं, तत् पृथगधिकरणे मन्त्रनामधेययोः पृथगप्रामाण्यस्य निराकरिष्यमाणत्वेन पुनरुक्तत्वादनुपयुक्तत्वाच्चोपेक्षितम् । मूले तु शिष्यशिक्षार्थं कृतमिति वेदितव्यम् ॥ १ ॥

सू—शास्त्रदृष्टविरोधाच्च ॥ १—२—२ ॥ (पू)

किञ्च 'वायुर्वै क्षेपिष्ठे' त्यादौ धर्मप्रमानुत्पादनेऽपि स्वार्थेऽपि तावत्सत्यत्वानिश्चयः। 'सोऽरोदी'दित्यादावप्यतीतार्थकथनेन योग्यानुपलब्ध्यभावान्न स्वार्थासत्यत्वनिश्चयः । "स्तेनं मनोऽनृतवादिनी वागि" त्यत्र तु स्तेयमनृतवदनशीलत्वञ्च वाङ्मनसयोरुच्यमानं योग्यानुपलब्ध्या स्वार्थेऽप्यप्रामाण्यमापादयति । यदि त्वौपचारिकं स्तेनशब्दलक्षितं प्रच्छन्नरूपत्वं मनसो, वाचश्च प्रायिकमनृतवादिनीत्वमनूद्येत, ततो (१)भूतानुवादादप्रामाण्यम् ।

अथ तु प्रामाण्यलिप्सया पूर्वोक्तदूषणगणमभ्युपगम्याप्यध्याहारादिभिर्विधिः कल्प्येत—वाङ्मनसे अपि यतः स्तेनानृतवादिनी तस्मादन्येनापि पुंसा स्तेयं मृषोद्यञ्च कर्तव्यमिति, तत्राप्ययमपूर्वविधिर्वा स्यात्? परिसंख्याविधिर्वा?—द्रव्यार्जनं वाग्व्यवहारं वा कुर्वन् स्तेयातिरिक्तं मृषोद्यातिरिक्तञ्चोपायं न कुर्वीतेति । नियमविधिर्वा—स्तेयं मृषोद्यञ्च कुर्वीतैवेति । नाद्यः; प्राप्तार्थत्वात्, स्वर्गार्थत्वकल्पने च गौरवापत्तेः; 'स्तेयं न कुर्यात्' 'नानृतं वदे' दित्यादिशास्त्रस्यापूर्वविषयकत्वकल्पनाय संकोचरूपबाधापत्तेश्च । न द्वितीयः; दोषत्रयापत्तेः, परिसंख्याफलकत्व-

१ प्रमाणान्तरसिद्धार्थबोधकत्वेनाज्ञातज्ञापकत्वाभावादिति भावः।

स्य सत्यां गतावन्याय्यत्वाच्च । 'ब्राह्मणः प्रतिग्रहादिना द्रव्यमार्जयेत्' 'सत्यमेव वदे'दित्यादिशास्त्राविरोधश्च तदवस्थः ।

एवं यद्यपि गौरवत्रैदोष्यभिया (१)ऋतौ भार्यामुपेया' दितिवन्नियमविध्याश्रयणं, तथापि "स्तेयं न कुर्या"दित्यादिशास्त्रविरोधस्तदवस्थ एव । न च(२) ग्रहणाग्रहणवाद्विकल्पः, क्लृप्तकल्प्यत्वेन वैषम्यात् । नच(३) "न तौ पशौ करोती" तिवत् कल्प्यविधिप्राप्तेनापि क्लृप्तविधिविहितस्योपजीव्यत्वात् विकल्पोऽस्त्विति वाच्यम् । तद्वदिह निषेधस्य रागप्राप्तस्तेयानृतवादोपजीवनेन कल्प्यविध्युपजीवकत्वाभावात् । अतश्शास्त्रविरोधापत्तेरप्यप्रमाणम् ।

किञ्च "धूम एवाग्नेर्दिवा ददृशे नाग्निः" "आर्चिरेवाग्नेर्नक्तं ददृशे न धूम" इत्यादेर्दृष्टविरोधात् स्वार्थेऽप्यप्रामाण्यं निर्विवादम् । एवं तदुपपादकस्य-"दिवाग्निरादित्यं गतो रात्रावादित्यस्त" मित्यस्यापि । अतश्च निरालम्बनत्वात्सिद्धान्त्यभिमेतस्तावकत्वेन विध्येकवाक्यतापि दुरुपपादा ।

तथोदाहरणान्तरेऽपि "न चैतद्विद्मो ब्राह्मणास्स्मो वयमब्राह्मणा वे" त्यत्र दृष्टविरोधः ।

ननु नायं दृष्टविरोधः,(४) "सवर्णेभ्यस्सवर्णासु जायन्ते हि सजातय" इत्यादिशास्त्रगम्यत्वाद्ब्राह्मणत्वादीनाम् । ब्राह्मण-

---

१ गौ.ध. ५-१. अस्य नियमविधित्वं परिसंख्याविधित्वमित्युभयमप्यङ्गीकृतं शास्त्रकारैः ।

२ अतिरात्रे षोडशिनं गृह्णाति, नातिरात्रे षोडशिनं गृह्णातीत्यत्र विहितप्रतिषेधात् यथा विकल्पः तथेत्यर्थः ।

३ तौ आज्यभागौ पशुयागे न करोतीत्यर्थः । अतिदेशस्य कल्प्यत्वेन तत्प्रापितयोः आज्यभागयोः अतिदेशप्राप्तपदार्थविषयकेण निषेधेनात्यन्तबाधायोगात् विकल्प एवाङ्गीक्रियते तद्वदिहाप्यस्तु इत्याशङ्कतुराशयः ।

४ याज्ञ. स्मृ. १.९०।

मातापितृसम्बन्धानभिज्ञस्य चक्षुस्सन्निकृष्टेऽपि ब्राह्मणोऽयमित्यननुभवाच्च । न च ब्राह्मणमातापितृसम्बन्धस्य ब्राह्मणत्वजात्याभिव्यञ्जकस्यानुपस्थितेर्न क्षतिरिति वाच्यम्, नैवोत्पादकब्राह्मणत्वजातिज्ञानस्य सहकारित्वम्, आत्माश्रयापत्तेः ।

वस्तुतस्तु ब्राह्मणत्वादिजातावेव मानाभावः, विश्वामित्रादौ साङ्कर्यप्रसङ्गात् । अतो विशुद्धमातापितृजन्यत्वं, (१)"शमो दमस्तपश्शौचं सत्यमिन्द्रियनिग्रहः । ज्ञानं विज्ञानमास्तिक्यं ब्राह्मं कर्म स्वभावजम्" इतिस्मृतेर्वा शमदमादिजन्यादृष्टवत्त्वं ब्राह्मणत्वम् । तस्य च प्रत्यक्षागोचरत्वात् कथं दृष्टविरोधोदाहरणत्वमिति चेत्-न; ब्राह्मणोऽयमित्यनुगतप्रतीत्या घटत्वादिजातिवत् ब्राह्मणत्वादिजातिस्वीकारे बाधकाभावात् । न च साङ्कर्यम्, विश्वामित्रे तपःप्रभावेन ब्राह्मणाधिकृतकर्माधिकारोत्पत्तावपि (२)ब्राह्मणत्वजातेरस्वीकारात् । एवं "मासेन शूद्रीभवति ब्राह्मणः क्षीरविक्रयादि" त्यादावपि न शूद्रत्वादिजातिमत्ता । अत एव शूद्रीभवतीत्यभूततद्भाववाचिच्विप्रत्ययप्रयोगः । न चाभिव्यञ्जकाभावः; ब्राह्मणत्वजातिमन्मातापितृसम्बन्धजन्यत्वस्याभिव्यञ्जकत्वात् । एकत्वेऽपि चोत्पादकव्यक्तिसम्बन्धित्वेनाभिव्यञ्जकत्वम्, उत्पाद्यव्यक्तिसम्बन्धित्वेन चाभिव्यंग्यतेति न विरोधः। तच्चाभिव्यञ्जकज्ञानं मातुः प्रत्यक्षेण, अन्येषां त्वाप्तोपदेशादिनेत्येतावान् विशेषः । न त्वेतावताऽभिव्यञ्जकज्ञानवतश्चक्षुषा ब्राह्मणत्वप्रत्यक्षे कश्चिद्विरोधः ।

अत्र "(३)विन्नास्वेष विधिस्स्मृत" इतिवचनादभिव्यञ्जके

१. भगवद्गी. १. ८४.

२. ब्राह्मणत्वादि. इति क. पु.

३. याज्ञ. स्मृ.१.९२. विन्नासु विवाहितास्वित्यर्थः ।

विवाहितपदं देयम्। तेन कुण्डगोलकयोर्व्यभिचारोत्पन्नयोर्न ब्राह्मणत्वमिति केचित्।

वस्तुतस्तु गौरवापत्तेर्न विवाहितपददानम्। गोर्गव्युत्पन्नस्य गोत्ववद्ब्राह्मणाद्ब्राह्मण्यामुत्पन्नस्यैव ब्राह्मणत्वोपपत्तेः। 'विन्नास्वि'ति वचनं तु (१)ब्राह्मणादिविहितकर्मानाधिकारमात्रप्रतिपादनपरम्। कुण्डगोलकयोस्तु सत्येव ब्राह्मण्येऽवान्तरसंज्ञाकरणं कार्यविशेषविधानार्थम्। अत एव श्राद्धे(२) तयोर्निषेधो ब्राह्मणत्वेन प्रसक्तत्वात् सङ्गच्छते। न चोक्तविधाभिव्यञ्जकस्य सृष्ट्याद्यब्राह्मणेऽभावादव्यापकत्वम्। अस्मन्मते प्रलयप्रतिपादकवचनानामर्थवादत्वेन सृष्ट्यादेरनङ्गीकारात्।

यत्तु शमादिवचनं, तन्न शमादिजन्यादृष्टवत्त्वं ब्राह्मणत्वमित्येतत्परम्, गौरवापत्तेः। नापि शमादीनां तदभिव्यञ्जकत्वपरम्, (३)शमादिमत्यदुष्टशूद्रे व्यभिचारात्। अतः प्रायिकद्योतकत्वपरम्, शमाद्यधिकारविधानार्थं वेति द्रष्टव्यम्। तस्माद्ब्राह्मणत्वस्य प्रत्यक्षसिद्धत्वात्तद्विरुद्धं "न चैतद्विद्म" इत्यादिवचनं स्वार्थेऽप्यप्रमाणम्।

तथा "(४)को हि तद्वेद यद्यमुष्मिन् लोकेऽस्ति वा न वेती" त्यादीनां स्वर्गसद्भावाज्ञानप्रतिपादनात्स्वार्थेपि प्रामाण्यम्; "ज्योतिष्टोमेन स्वर्गकामो यजेत" इत्यादिशास्त्रस्य ज्ञापकस्य सत्त्वेन शास्त्रविरोधात्। अत्र शास्त्रविरोधदृष्टविरोधयोरुदाहरणद्वयं (५)परिहारभेदात् प्रदर्शितम्। व्युत्क्रमश्च परि-

---

१. ब्राह्मणाधिकारविहित. इति क. पु.

२. शूद्रशिष्यो गुरुश्चैव वाग्दुष्टः कुण्डगोलकौ। म. स्मृ. ३.१५६. इति मन्वाद्युक्तो निषेधः इत्यर्थः।

३. शमादिमति दुष्टशूद्रे. इति. ख पु.

४. तै. सं. ६-१-१   ५. परिहारहेतुभेदात्. इति क. पु.

हारसूत्रक्रमानुरोधेन । तत्कारणं तु तत्रैव प्रदर्शयिष्यते ॥

सूत्रं निगदव्याख्यातम् ॥ २ ॥

सू—तथा फलाभावात् । ॥ १—२—३ ॥ (पू)

(१)गर्गत्रिरात्रब्राह्मणं प्रकृत्य श्रूयते—"शोभतेऽस्य मुखं य एवं वेद" इति । अत्र गर्गत्रिरात्रब्राह्मणार्थज्ञानकाले उच्यमानाया वर्तमानमुखशोभाया योग्यानुपलब्धिबाधितत्वात् स्वार्थेऽप्रामाण्यम् । न हि तज्ज्ञानकाले मुखशोभा दृश्यते, आयासेन विपरीतशोषदर्शनात् । अथ ज्ञानफलानुवादः, तदपि प्रत्यक्षविरुद्धम्, तदानीमजायमानत्वात् । न च कालान्तरे भविष्यतीत्यत्र (२)प्रमाणमस्ति । नच 'शोभत' इत्यस्यैव विभक्तिव्यत्ययेन भविष्यदर्थकत्वं परिकल्प्य रात्रिसत्रवत्फलपरत्वसम्भवः, ज्ञानस्य गर्गत्रिरात्रानुष्ठानयोग्यतासंपादनद्वारा तत्कर्तृसंस्कारस्य (३)'तीर्थे स्नाति' त्यादिवत्परार्थत्वेन प्रयोजनानाकाङ्क्षत्वात्फलपरत्वकल्पनानुपपत्तेः । अतश्च पर्णमयीन्यायेनैवास्य फलकल्पकत्वासम्भवादप्रामाण्यम् । न च तेन पौनरुक्त्यम्—एतत्सूत्रे फलपरत्वासम्भवेनानर्थक्यमाशंक्यते,, तत्र तु फलपरत्वासम्भवेनैवार्थवादत्वं सिद्धान्त्यत इत्यदोषः ॥ सूत्रं निगदव्याख्यातम् ॥ ३॥

---

१. गर्गत्रिरात्रो नाम त्रिसुत्याकोऽहीनविशेषः । गर्गत्रिरात्रेण प्रजातिं भूमानं गच्छत्यभिस्वर्गलोकं जयति (आप. श्रौ. २२–१५–१.) इति विहितः ।

२ नियामकं इति क. पु.

३ तै. सं. ६–१–१ ज्योतिष्टोमप्रकरणे विहितस्य तीर्थस्नानस्य यथा तदीयकर्तृसंस्कारद्वारा ज्योतिष्टोमाङ्गत्वात् न स्वतन्त्रफलापेक्षा तद्वदित्यर्थः । तीर्थस्नानस्य क्रतुयुक्तपुरुषसंस्कारद्वारा क्रत्वङ्गत्वं तृतीयाध्यायचतुर्थपादे सिद्धान्तितम् । यत्र ऋष्यादयो महात्मानो नियमेन स्नान्ति सोऽवतारदेशस्तीर्थमित्यभिधीयते ।

सू—अन्यानर्थक्यात् । ॥ १—२—४ ॥ (पू)

"पूर्णाहुत्या सर्वान् कामानवाप्नोति" "पशुबन्धयाजी सर्वान् लोकानभिजयति" "तरति मृत्युं, तरति पाप्मानं, तरति ब्रह्महत्यां योऽश्वमेधेन यजते, य उ चैनमेवं वेद" इति ।

अत्रापि पर्णमय्यधिकरणन्यायेन पूर्णाहुतेराधानाङ्गभूतकर्मरूपत्वात् प्रयाजादिवत्प्रयोजनानपेक्षत्वम्। (१)मूले तु अग्निसंस्कारकत्वान्न तदित्युक्तम् । पशुबन्धस्यापि ज्योतिष्टोमाङ्गभूतकर्मरूपत्वादेव न फलापेक्षत्वम् । अश्वमेधज्ञानस्य तु गर्गत्रिरात्रब्राह्मणज्ञानवत् कर्तृसंस्कारकत्वादेव प्रयोजनानपेक्षत्वम् । अतश्चानपेक्षत्वादेवैतेषां फलकल्पकत्वासंभवः । अभ्युपेत्यापि तु फलकल्पकत्वं प्रामाण्य उच्यमाने यदि तावत्स्वतन्त्रफलार्थत्वं ततो वाक्येन कल्प्येन प्रकरणावगतक्रत्वर्थत्वबाधः । (२)अथायुरादिवदानुषङ्गिकफलार्थत्वं, ततः पूर्णाहुत्यादिनैव सर्वकामावाप्तौ जातायां तदुत्तरभाविनां क्रतुविधीनामानर्थक्यप्रसङ्गः । न हि पूर्णाहुतिमग्न्युत्पादकाधानाङ्गभूतामकृत्वा अग्निसाध्येषु कर्मस्वधिका-

---

१. भाष्यकारेण—पवमानेष्टीनां नाधानाङ्गत्वम्, किन्तु आधानवत् साक्षादेवाग्निसंस्कारद्वाराऽग्न्यङ्गत्वम्—इत्युक्तम् ।

२. दर्शपूर्णमासप्रकरणे—"सूक्तवाकेन प्रस्तरं प्रहरति" इति वाक्येन सूक्तवाकाख्यमन्त्रकरणकं प्रस्तरप्रहरणमाम्नानम् । सूक्तवाको नाम "इदं द्यावापृथिवी भद्रमभूत्" इत्यनुवाकपठितो मन्त्रविशेषः । प्रस्तरो वेद्यां हविरासादनार्थं मास्तारितो दर्भमुष्टिः । प्रहरणं अग्नौ प्रक्षेपः । तत्र "आयुराशास्ते, सुप्रजास्त्वमाशास्ते," इत्यादय आयुरादिप्रार्थनारूपा आम्नाताः प्रस्तरप्रहरणस्य दर्शपूर्णमासाङ्गभूतत्वात् तदुपकारकत्वं विनानान्यत् पृथक् फलं तस्य, तथापि तन्मन्त्रप्रतिपाद्यानामायुरादिफलानामपि आनुषङ्गिकतया प्रस्तरजन्यत्वमङ्गीक्रियते, तद्वदिति भावः ।

रस्सम्भवति । न चाग्नीषोमीयमकृत्वा ज्योतिष्टोमे साङ्गतास्ति । अश्वमेधज्ञानं विना चाश्वमेधाकरणमसामर्थ्यात् स्पष्टम् । अतश्च पूर्वभाविभिः पूर्णाहुत्यादिभिरेव तत्तत्फलावाप्तौ तदुत्तरभाविनां क्रतुविधीनामानर्थक्यप्रसङ्गो दुर्वारः ॥ (१)सूत्रं निगदव्याख्यातम् ॥

सू—अभागिप्रतिषेधात् ॥ १—२—५ ॥ (पू)

"न पृथिव्यामग्निश्चेतव्यो नान्तरिक्षे न दिवी"त्यत्रान्तरिक्षे दिवि वा तावच्चयनस्याप्राप्तत्वान्न प्रतिषेधयोग्यत्वम् । एवं पर्युदासोऽपि निराकर्तव्यः; अनन्तरिक्षे अदिवि च पृथिव्यां चयनस्य नित्यप्राप्तत्वात् । पृथिवीचयनप्रतिषेधोऽपि चयनविधेः प्रामाण्ये ऽप्रामाण्ये वोभयथाप्यनुपपन्नः । न हि चयनं कुर्वता पृथिवीचयन(२)प्रतिषेधार्थश्शक्यते सम्पादयितुम् । अकुर्वतस्तु प्राप्त्यभावादेव प्रतिषेधवैयर्थ्यम् । एवं पर्युदासानुपपत्तिरपि द्रष्टव्या । अतो नामान्तरेण चयनप्रतिषेधार्थमेव तादित्यङ्गीकर्तव्यम् । तथाच तद्विधिवैयर्थ्यमपि । न च(३)ग्रहणाग्रहणवत् पाक्षिकत्वसिध्यर्थः प्रतिषेधोऽर्थवान् स्यादिति वाच्यम्; (४)पशुकामश्चिन्वीत' "प्रजाकामश्चिन्वीते" त्यादिवाक्यै(५)रग्नेः काम्यत्वावगमादेव पाक्षिकत्वसिद्धेः प्रतिषेधवैफल्यात् । न चैतैरग्नेः काम्यत्वावगमेऽपि "अथातोऽग्निमग्निष्टोमेने" त्यादिवचनै-

---

१. सूत्रं नियन्त्रितम् । इति क. पु. २ निषेधार्थः इति क. पु.

३. अतिरात्रे षोडशिनं गृह्णाति, नातिरात्रे षोडशिनं गृह्णाति' इति वाक्यद्वयं श्रूयते । तत्र पूर्ववाक्यविहितस्य षोडशिग्रहणस्य पाक्षिकत्वसिध्यर्थं प्रतिषेध उत्तरवाक्येन क्रियते तद्वदिहापीत्यर्थः ।

४. तै. आ. १—२६—४.

५. इष्टकोपधानसम्पादितस्थण्डिलविशेषोऽत्राग्निपदार्थः ।

(१)संयोगपृथक्त्वन्यायेन क्रत्वर्थत्वस्यापि वक्ष्यमाणत्वात् तस्य पाक्षिकत्वार्थं प्रतिषेधोऽर्थवानिति वाच्यम् । उत्तरवेदिमात्रेणापि निरग्निकस्यापि क्रतुप्रयोगस्य "ते यद्यग्निं चेष्यमाणा भवन्ती"ति सत्रे(२) समारोपणकालादिगुणविधिपरे वाक्ये सिद्धवत्पाक्षिकत्वानुवादादिभिर्लिङ्गैः(३)र्दशमे वक्ष्यमाणत्वात् । अत एव (४)अग्निं सोमाङ्गमिच्छता" मिति कात्यायनोऽप्युक्तवान् । साग्निके प्रयोगे परं(५) "उत्तरवेद्यां ह्यग्निश्चीयत" इति वचनादग्न्युत्तरवेद्योस्समुच्चयस्सङ्कर्षे उक्तः । न त्वेतावता क्रत्वर्थस्याग्नेर्नित्यत्वम् । अतश्चाग्नेः पाक्षिकत्वस्य सिद्धत्वात्तत्प्राप्त्यर्थं प्रतिषेधानर्थक्यम् । किञ्च पृथिवीचयननिषेधस्य चयनक्रियायां कल्प्यत्वेन क्लृप्तचयनविधेः पाक्षिकत्वापादनायोगः । अत एवंजातीयकं स्वार्थेऽप्यप्रमाणम् । अप्रतिषेधभागित्वादिति सूत्रार्थः ॥

सू—अनित्यसंयोगात् ॥ १-२-६ ॥ (पू)

(६)"बबरः प्रावाहणिरकामयत वाचः प्रवदिता स्यामिति" इत्यत्र स्वार्थपरत्वे अनित्यसंयोगः परं प्रसज्येत । न ह्यनित्यं बबरनामानं पुरुषं प्रतिपादयतो वेदस्य स्वार्थे प्रामाण्यं सम्भवति, आदिमत्तादोषप्रसङ्गात् । यद्यपि च "(७)परं तु श्रुतिसामान्यमात्र" मित्यत्र एतद्दोषपरिहारार्थं बबरादिशब्दानां नित्यसिद्धवाय्वादिपरत्वमुक्तम्, तथाप्यत्रार्थवादानां कथमपि प्रामा-

---

१. एकस्य तूभयत्वे संयोगपृथक्त्वम् , इति न्यायः ।
एकस्य कर्मणो द्रव्यादेर्द्रव्यस्य वोभयोद्देशेन विधायकं वाक्यद्वयं यत्र स संयोगपृथक्त्वन्यायः ।

२. समारोप. इति ख. पु. ३. १०-३-८
४. का. श्रौ. १६-१,२. ५. तै. आ. १. २६-३.
६. तै. सं. ७-२-१०-२. ७. पू. मी. १-१-३१.

ण्ये निराकृते बबरादिशब्दानां श्रौतार्थत्यागकारणाभावान्न लक्षणया वाय्वादिपरत्वं युक्तमाश्रयितुम् । अतश्चानित्यसंयोगप्रसङ्गस्तदवस्थ एवेत्याक्षिप्यते । सूत्रं निगदव्याख्यातम् ॥ ६ ॥ तस्मादप्रमाणमर्थवादा इति पूर्वः पक्षः ॥

सू—विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः ॥ १-२-७ ॥ (सि)

(सिद्धान्तः)

तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः । सत्यमर्थवादानां न स्वार्थवृत्त्या धर्माधर्मप्रमोपयोगसम्भवः, प्राशस्त्यलक्षणया विध्येकवाक्यत्वेन तदुपयोगस्तु दुर्वारः । तत्रापि प्राशस्त्यलक्षणायां यद्यपि नान्वयानुपपत्तिर्बीजम्, तथाप्यध्ययनविध्यवगततात्पर्यानुपपत्तिरेव बीजम् । तथा हि—"स्वाध्यायोऽध्येतव्य" इत्यत्र(१०) "प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च" इति स्मृत्या तव्यप्रत्ययस्य प्रैषवाचित्वात् (११)प्रैषस्य च प्राप्तविषयत्वप्रवर्तनात्मकत्वसमुदायरूपत्वात्, ब्राह्मणे च प्राप्तविषयत्वासम्भवेन समुदायासम्भवेऽपि तदेकदेशलक्षणया तव्यप्रत्ययेन प्रवर्तनाऽभिधीयते । तस्याश्च प्रवृत्त्यनुकूलव्यापाररूपत्वात् प्रवृत्तिरूपार्थभावनापि तेनैवाक्षिप्यते । तस्याश्च भाव्यापेक्षायां कर्मोत्पन्नतव्यप्रत्ययोपात्तकर्मत्वस्य स्वाध्यायस्य भाव्यत्वेनान्वये जाते अध्ययनस्य(१२)भावार्थाधिकरणन्यायेन करणत्वेनान्वयः कल्प्यते । स्वाध्यायस्य

---

१ पा. सू. ३-३-१६३.

२. प्रवर्तनस्मृतिः प्राप्ते प्रैष इत्यभिधीयते ।
   अप्राप्तप्रापणं सर्वं विधित्वं प्रतिपद्यते ॥

३. पू. मी. २. १. २.

चाध्ययनं प्रत्युत्पाद्यत्वरूपकर्मत्वासम्भवादाप्यत्वरूपं तदाश्रीयते । ततश्चाध्ययनेनाक्षरग्रहणद्वारा स्वाध्यायं प्राप्नुयादित्यर्थः । निष्प्रयोजनस्य च स्वाध्यायस्य कर्मत्वानुपपत्तेः प्रयोजनाकाङ्क्षायां दृष्टसम्भवे ऽदृष्टकल्पनानुपपत्तेः स्वाध्यायजन्यं दृष्टमर्थज्ञानादिप्रयोजनमाश्रीयते ।

नचैवं संस्कारविध्यन्यथानुपपत्त्या प्रयोजनकल्पनायां (१)सक्तुष्वपि तदापत्तिः; प्रयोजनस्येह सामर्थ्यलभ्यत्वेनाकल्प्यत्वात् । अतश्च यथावघातादेरपूर्वसाधनीभूतव्रीहिवितुषीभावरूपसंस्कारार्थस्याप्यपूर्वार्थत्व एव विधेस्तात्पर्यम्, तथाऽध्ययनस्याप्यर्थज्ञानादिसाधनस्वाध्यायाक्षरग्रहणरूपसंस्कारसाधनस्यार्थज्ञानाद्यर्थत्व एवाध्ययनविधेस्तात्पर्यम् । एवंच निष्प्रयोजनार्थज्ञानस्य प्रयोजनत्वासम्भवात् प्रयोजनवत्तामर्थस्य स्वाध्यायविधिरवबोधयति । एवंचार्थवादानां (२)वाच्यार्थस्य निष्प्रयोजनत्वात्तदसम्भवे लाक्षणिकस्यापि प्राशस्त्यस्य गौणसामर्थ्यलभ्यत्वेन दृष्टत्वात् तत्परत्वं स्वाध्यायविधिबलादवगम्यते ।

यत्तु वार्त्तिके—साक्षादध्ययनस्यैवार्थज्ञानभावनाकरणत्वमुक्त्वा अर्थवादानां प्राशस्त्यलक्षणोपपादिता, तद्बलेन च भवदेवेनाध्ययनस्यार्थकर्मत्वं, स्वाध्यायस्य तु सक्तुन्यायेन विनियोगभङ्गं परिकल्प्याध्ययनार्थत्वमेवेत्युक्तम्, तन्न—उक्तविधया संस्कारकर्मत्वोपपत्तौ विनियोगभङ्गे प्रमाणाभावात्; वार्तिककृता तु स्थलान्तरे(३) बादर्यधिकरणादौ संस्कारकर्मत्वस्याप्युक्तत्वादतिशयार्थमत्रार्थकर्मत्वमुक्तम् । यस्त्वस्मिन् पक्षे स्वाध्यायस्य संस्कार्य-

---

१. "सक्तून् जुहोति" इत्यत्र द्वितीयाश्रवणेऽपि सक्तूनां भूतभाव्युपयोगाभावेन कर्मत्वासम्भवात् द्वितीयायाः करणत्वलक्षकत्वमङ्गीकृत्य सक्तुकरणकहोमाविधिरेवाङ्गीकृतो द्वितीये, तद्विरुध्येतेति भावः ।

२ वाक्यार्थस्य इति ग. पु. । ३. पू. मी. ३-१-३.

त्वेनोद्देश्यत्वात्तद्विशेषणस्यैकत्वस्याविवक्षापत्तेः शाखान्तराधिकरणवार्तिकव्युत्पादितैकशाखाध्ययनविरोधप्रसङ्गः, स चैकत्वाविवक्षायामपि स्वाध्यायपदे स्वशब्देनात्मीयवाचिना पित्रादिपरम्परया आगताया एव शाखायाः कर्मव्युत्पत्त्या वाच्यत्वावधारणात् अनेकशाखाध्ययने च स्वशब्दवैयर्थ्यापत्तेः "अध्वर्युं वृणीत" इतिवच्चार्थज्ञानार्थताद्दशायामुपादेयत्वेनैकत्वविवक्षोपपत्तिरित्येवं तत्रैव निराकरिष्यते ।

यत्तु पूर्वपक्षवादिना प्रयोजनवदर्थज्ञानार्थत्वेऽध्ययनस्य लोकत एव प्राप्तत्वाद्विध्यानर्थक्यमुक्तम्, तत्र भवदेवः—शाब्दबोधत्वावच्छिन्नं प्रति तात्पर्यज्ञानस्य कारणत्वमन्वयव्यतिरेकासिद्धम्; असत्यामपि शब्दशक्तौ सति तात्पर्यज्ञाने गौरश्वः, पुरुष, इत्यत्राध्याहारादिना गौर्बध्यताम्, अश्वो गच्छति, पुरुषो वर्तते इत्येवं शाब्दबोधदर्शनात्, सत्यामपि च तस्यामसति तात्पर्यज्ञाने नानार्थस्थले(१)नार्थविशेषावधारणम्, तेन शब्दोच्चारणमात्रं शब्दवृत्तिज्ञानमात्रं वा नार्थबोधजनकम्, (२)किन्तु तात्पर्यज्ञानसहकृतं तत्, तच्च लोके पुरुषाशयवशादुन्नीयते, वेदे तु तदभावादर्थज्ञानोद्देश्यकाध्ययनविधिवशादेव तात्पर्यमुन्नेयम् । अतश्च विधिवाक्यानामप्यध्ययनविध्यभावे सति नैवार्थपरत्वमिति अध्ययनविधिरेव सकलस्य वेदस्यार्थतात्पर्यनिश्चायक इति न सत्यपि दृष्टार्थत्वे विधिवैफल्यमिति । (३)"अध्ययनविधिना इतरे सर्वे विधायकास्स्वात्मा च विनियुज्यते" इति(४)यथाश्रुतवार्तिकग्रन्था·

१ अर्थविशेषानवधारणं इति ग. पुस्तके ।
२ एवं च तात्पर्यं इति क. पु. ।
३ तं. वा. पृ. १३. पं. २०
४ यथाश्रुतेति नास्ति क. पुस्तके ।

(१)दध्ययमर्थो निश्चीयते-इति ।

न त्वेतद्युक्तमिव-शाब्दबोधत्वावच्छिन्नं प्रति तात्पर्यज्ञानस्य कारणत्वे शुकादिवाक्यात्(२) निस्तात्पर्यकाच्छाब्दबोधानापत्तेः । अतो लक्षणादिजन्यशाब्दबोधे नानार्थस्थले च तस्य कारणत्वं न सर्वत्र, व्यभिचारात् । न चैककार्यकारणभावकल्पनालाघवेन शाब्दबोधत्वावच्छिन्नं प्रति कारणत्वेऽवधृते शुकादिवाक्येऽपीश्वरतात्पर्यज्ञानं शब्दनिष्ठधर्मविशेषरूपतात्पर्यज्ञानं वा कारणत्वेन कल्प्यतामिति वाच्यम्; तात्पर्यज्ञानस्यानेकार्थबोधकपदजन्यशाब्दबोधत्वावच्छिन्नं प्रति कारणत्वकल्पनेना(३)स्मन्मतेऽपि लाघवस्याविशिष्टत्वात् । अस्तु वा सर्वत्रैव कारणत्वं, तथापि शुकादिवाक्यस्थले तात्पर्यग्राहकाभावेन बोधानुपपत्तिरनिवार्यैव ।

अथ तत्र शब्दस्वभावादेव तात्पर्यमनुमाय बोधः, तदा प्रकृतेऽपि दीयतां दृष्टिरिति कृतमध्ययनविधिना ।

किंच अध्ययनविधेरर्थज्ञानतात्पर्यकत्वे किमन्यद्ग्राहकमिति या गतिस्तस्य साऽन्येषामपि विधीनामिति न किंचिदेतत् । अत एवं परिहर्तव्यम्-सामर्थ्यापेक्षया प्रत्यक्षश्रुतेश्शीघ्रप्रवृत्तत्वेनावघातादिवदध्ययनविधिरनधिगतमेव प्रयोजनवदर्थज्ञानार्थत्वमध्ययनस्यावबोधयति, तत्फलं चार्थवादेषु प्राशस्त्यतात्पर्यकत्वबोधः ।

यद्यपीदं फलं विधिषु न सम्भवति, अध्ययनविध्यभावेऽपि विधिषु शब्दस्वभावादेवार्थतात्पर्यकत्वावधारणसम्भवात्, तथाऽप्यर्थवादेष्वेव सम्भवन्नासति बाधके त्यक्तुं युक्तम् । सर्वसाधारण्येन तत्फलं त्वध्ययनविधिसिद्धार्थज्ञानवत एव पुंसो लाभात् क्रतुविधीनां ज्ञानाक्षेपशक्तिकल्पनानुपपत्तेरुपायान्तर-

१ अध्ययमर्थोऽवगम्यत इति निश्चीयते इति क. पु. ।
२ असत्तात्पर्य इति क. पु. ३ अस्मिन् मते इति क. पु.

निवृत्तिफलका(१)ध्ययननियमः । एतद्विध्यभावे हि क्रतुविध्योऽनुष्ठेयार्थज्ञानार्थं पक्षे पुस्तकपाठाद्युपायान्तरमप्याक्षिपेरन् । अतस्तद्व्यावृत्त्या नियमफलकत्वमध्ययनविधेरुपपन्नमेव । न च येनापि त्रैवर्णिकेन नित्यत्वावेदकप्रमाणाभावान्नार्थज्ञानं सम्पादितम्, तद्विषये कथं तद्व्यावृत्तिसिद्धिः; "अनधीयाना व्रात्या भवन्ति"(२)"स्थाणुरयं भारवाहः किलाभूदधीत्य वेदं न विजानाति योऽर्थम्" इत्याद्यकरणनिन्दाश्रवणोन्नीतविधिबलेन नित्यत्वप्रतीतेः । अतस्साधारण्येन नियमफलकत्वेऽपि अर्थवादादिषु प्रयोजनवदर्थतात्पर्यकत्वेऽपि न काचित्क्षतिः । वार्तिकं तु सिद्ध्यदपि प्रमाणान्तरेण विधिषु प्रयोजनवदर्थपरत्वमध्ययनविधिबलेनाऽपि सिद्ध्यतीत्येतदर्थम् ।

यत्तु स्तोभाद्यंशे अदृष्टार्थत्वादितरांशे चार्थज्ञानार्थत्वे अपूर्वविधिनियमविधित्वकृतवैरूप्यापत्तिरित्युक्तम्, तन्न ; स्तोभानामपि सामभागपरिपूरकत्वेन दृष्टार्थत्वस्य (३)नवमे वक्ष्यमाणत्वान्न तदंशेऽपूर्वविधित्वम् । अतश्च दृष्टत्वेन भाव्यत्वानुगमादर्थज्ञानं सामभागपरिपूर्तिश्चेत्यनेकोद्देश्यताऽप्यनाशंक्या ।

यत्त्वकरणे प्रत्यवायाभियैव प्रवृत्तिसिद्धेरध्ययनमेव भाव्यमस्तीत्युक्तम्, तत् तव्यप्रत्ययेन स्वाध्यायस्य कर्मत्वोक्तेरपास्तम् । अवशिष्यते तु स्वाध्यायद्वारा यथाश्रुतार्थज्ञानस्यैव भाव्यत्वम् ; तत्त्वेवं निराकर्तव्यम्—व्रात्यताबोधकवाक्येनाध्ययनस्य गृहीतपदपदार्थसङ्गतिकस्य 'स्थाणुरयं भारहारः' इति वचनाच्च यथाश्रुतार्थज्ञानस्याप्यावश्यकत्वबोधनादेव प्राप्त्युपपत्तेरेतद्वाक्यानर्थक्यप्रसङ्गात् अनेन वाक्येन प्रयोजनवदर्थज्ञानसाधनीभूतस्वा-

१ अध्ययनविधिनियम इति क. पु.

२. निरु. ३. पू. मी. ९. २. ५.

ध्यायोद्देशेनैवाध्ययनं विधीयत इति। तेन सिद्धाऽध्ययनविध्यनुरोधेनार्थवादेषु प्रयोजनवदर्थान्तरलक्षणा। तच्चार्थान्तरं स्तुतिनिन्दारूपमेवेति विधिनिषेधापेक्षितत्वान्निर्णीयते। कथम्?–सर्वत्र हि चेतनप्रवृत्तिः क्वचित्स्वेच्छया क्वचित्परप्रवर्तनाजनितयेच्छयेत्यविवादम्, तद्यत्र शब्दश्रवणोत्तरं प्रवृत्तिः, तत्र परस्य प्रवर्तनेन प्रवर्तकत्वं निश्चीयते। प्रवर्तना चेयं पुरुषप्रवृत्तिहेतुः प्रवर्तयितुर्धर्मः, प्रवर्तयितृधर्मत्वाभावे 'देवदत्तो मां प्रवर्तयति न यज्ञदत्त' इति व्यवस्थानुपपत्तेः।

अथास्य प्रवर्तनाज्ञापनमात्रेण प्रवर्तकत्वं, नाश्रयत्वेन, ततो 'देवदत्तस्त्वां प्रवर्तयती'तिवाक्यप्रयोक्तुः यज्ञदत्तस्य प्रवर्तकत्वापत्तिः। लोके चाहमेनं प्रवर्तयामीति प्रवर्तयितुरनुभवात्तद्धर्मत्वम्। अत्र चाचार्यत्वादेः प्रवर्तयितुर्धर्मत्वेऽपि प्रवृत्तिहेतुत्वाभावादाद्यं विशेषणम्। धर्मपदश्च समवेतत्वपरम्, अतश्च लोकनिन्दादेः प्रवृत्तिहेतुत्वेऽपि प्रवर्तयितृपुरुषसमवेतत्वाभावादपरम्। पुरुषप्रवृत्तिश्च परसमवेता विवक्षिता। तेनाचार्यसमवेतफलस्य दुग्धपानादेर्गामानयेतिवाक्योच्चारणानुकूलाचार्यनिष्ठप्रवृत्तिहेतुत्वेऽपि शिष्यप्रवृत्तिहेतुत्वे प्रमाणाभावान्नातिप्रसङ्गः। स च धर्मो लोके प्रैषादिरूपः पुरुषाशयविशेषः, वेदे तु (१)तदभावाल्लिङादिनिष्ठ एव कश्चित्कल्प्यः। प्रैषादीनां हि प्रवृत्तिहेतुत्वमाचार्यप्रेषितोऽहं गामानयामीत्यनुभवसिद्धम्। हेतुत्वं चात्र न जनकत्वं प्रमाणाभावात्, अपि तु प्रयोजकत्वं, तच्च प्रवृत्तिकारणीभूतेष्टसाधनताज्ञानजनकज्ञानविषयत्वम्। प्रवर्तनारूपस्याशयादेर्ज्ञानेनेष्टसाधनत्वानुमानात्। अतो युक्तं प्रैषादीनां निरुक्तप्रवृत्तिहेतुत्वम्।

१. पुरुषाभावात् इति क. पु.

अतश्च प्रवर्तनाज्ञानकारणजिज्ञासायां शब्दश्रवणोत्तरभावित्वादावापोद्वापाभ्यां घटादिपदशक्तिवदेव वृद्धव्यवहारेण लिङादीनां प्रैषादिरूपप्रवर्तनायां शक्तिर्निश्चीयते। (१)"विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्" "लोट्च" लिङर्थे लेट्" इत्याद्यनुशासनबलादप्ययमर्थो निश्चीयते । तत्र विधिर्निकृष्टस्य प्रेरणम् ; अयमेव च व्याकरणे प्रैषः । लोके तु प्राप्ते विषये निकृष्टस्य प्ररणमिति विवेकः । निमन्त्रणमावश्यके श्राद्धादौ दौहित्रादेः प्रवर्तनम् । आमन्त्रणं कामचारानुज्ञा; इदमेवातिसर्गपदेनाभिधीयते । अधीष्टं सत्कारपूर्वको व्यापारः । अत्र नानार्थकत्वपरिहाराय प्रवर्तनात्वमेवैकं शक्यतावच्छेदकं घटत्वादिवत् । वस्तुतस्तु लाघवादनुकूलव्यापारत्वमेव शक्यतावच्छेदकम्, प्रवृत्तिनिरूपितत्वं तु वाक्यार्थविधया लभ्यम्, आख्यातार्थकृतौ स्वर्गादिनिरूपितत्ववत् । प्रवर्तकनिष्ठत्वं च योग्यतालभ्यमिति द्रष्टव्यम् ।

अथ वा विध्यादिषु चतुर्षु वैदिके च वक्ष्यमाणे अलौकिके धर्मे प्रवर्तनात्वमखण्डोपाधिः प्रवृत्तिप्रयोजकतावच्छेदककोटिप्रविष्टतया कल्प्यते, तदवच्छिन्नविषयकज्ञानप्रयोज्यतावच्छेदकं चाव्यवहितोत्तरत्वसंबन्धेन तादृशज्ञानविशिष्टप्रवृत्तित्वम् । नातस्तदनुत्तरप्रवृत्तौ व्यभिचारः । अखण्डोपाधिरेव च लिङादिपदशक्यतावच्छेदक इति तत्त्वम् । अतो विध्यादय एव चत्वारो व्यक्तिस्थानीया लोके लक्ष्याः, सम्प्रश्नप्रार्थनयोस्त्वतिरिक्तैव शक्तिः, आनुशासनिकी वा लक्षणा । एतेषां च पुरुषाशयविशेषाणां प्रैषादीनां वेदेऽसंभवात् प्रवर्तनात्वेन च शक्तेर्लिङादिषु गृहीतत्वात्तदनुरोधेन प्रवर्तनाविशेषरूपो विधिप्रेरणानियोगापरनामधेयरूपोऽलौकिको धर्मस्स्थायी कल्प्यते । स च प्रैषादिवत्प्रवर्तकधर्मत्वावगतेर्वेदे च

१ पा. सू. ३. ३. १६१. पा. सू. ३. ३. १६२. पा सू. ३. ४. ७.

पुरुषाभावादन्यस्य च यागादेरसिद्धत्वेन प्रवृत्तिविषयत्वेन च प्रवर्तकत्वानुपपत्तेः पारिशेष्याल्लिङादेरेव प्रवर्तकत्वावधारणात्, लिङादेश्च वर्णरूपत्वेन स्थायित्वात्तन्निष्ठोऽवधार्यते। तस्य च प्रवृत्तिहेतुत्वादुक्तलक्षणाव्याहतिः ।

अत्र षष्ठे शास्त्रदीपिकायां पार्थसारथिः—नातिरिक्तधर्मान्तरकल्पनम्, तथा सति तत्सद्भावस्तस्य च प्रवृत्तिहेतुत्वं लिङादिनिष्ठत्वं तल्लक्ष्यत्वमिति चतुष्टयकल्पनाद्गौरवापत्तेः। अतो लाघवादर्थभावनाभिधानानुकूलशक्तेरभिधाख्याया लिङादिनिष्ठत्वेन क्लृप्तायाः (१)केवलं प्रवृत्तिहेतुत्वं लिङादिलक्ष्यत्वं च कल्प्यम् । (२),अतः सैव प्रवर्तनात्वेन लिङाद्यभिहिता प्रवृत्तिहेतुर्विध्यादिपदाभिधेया चेति । तन्न; तर्हि ततोऽप्यतिलाघवेनेष्टसाधनत्वस्य प्रवृत्तिहेतुत्वेनापि क्लृप्तस्य लिङादिलक्ष्यत्वमात्रकल्पनया (३)प्रवर्तनाविशेषत्वोपपत्तेर्जितं मण्डनेन ।

न चेष्टसाधनत्वस्य यागादिनिष्ठत्वेन लिङादिनिष्ठत्वाभावाद्यागादेश्चासिद्धत्वेन प्रवर्तकत्वायोगात् प्रवर्तनायाः प्रवर्तकनिष्ठत्वस्य स्थापितत्वान्नेष्टसाधनत्वस्य प्रवर्तनाविशेषत्वोपपत्तिरिति वाच्यम्; तर्हि फलेच्छाया उपायेच्छाया वा सिद्धत्वेन लिप्सां प्रवर्तयतीतिवदिच्छा मां प्रवर्तयतीत्यनुभवाच्च प्रवर्तकत्वोपपत्तेस्तन्निष्ठत्वेन क्लृप्तस्येच्छात्वस्य प्रवृत्तिहेतुत्वं इच्छात्वेन (४)कामपदाभिधेयत्वेऽपि प्रवर्तनात्वेन लिङादिवाच्यत्वं परिकल्प्य प्रवर्तनाविशेषत्वोपपत्त्या विनिगमनाविरहात् ।

न चेच्छायाः प्रवर्तकत्वे इच्छात्वे प्रवृत्तिहेतुत्वाभावेऽपि हेतुतावच्छेदकत्वस्य क्लृप्तत्वाल्लाघवेन तस्यैव प्रवर्तनाविशे-

---

१ केवलं इति नास्ति क. पु. २ अतः इति नास्ति क. पु.
३ प्रवर्तनात्वोपपत्तेः क. पु. ४ कामपदाभिहितत्वेऽपि. इति.ग. पु.

षत्वोपपत्तौ न तदादाय शक्तेर्विनिगमनाविरहश्शंक्यः इति वाच्यम्, इच्छावत् कृतिसाध्यत्वज्ञानस्यापि सिद्धत्वेन प्रवर्तकत्वात्तन्निष्ठज्ञानत्वस्य प्रवर्तनात्वेन लिङादिपदवाच्यत्वकल्पनया प्रवर्तनाविशेषत्वोपपत्तौ तदादायेच्छात्वेऽपि विनिगमनाविरहस्यावारणात् ।

न चेच्छात्वादीनामतिप्रसक्तत्वेन प्रवर्तकमात्रनिष्ठत्वाभावान्न तेषां प्रवृत्तिहेतुत्वकल्पनाशंका; शक्तेरपि लिङादिष्वतिप्रसक्तत्वस्य तुल्यत्वात् । तस्मात् क्लृप्तैर्विनिगमनाविरहाद्धर्मान्तरकल्पनैवोचितेत्युत्पश्यामः ।

नचैवं धर्मान्तरस्यापि लिङादिनिष्ठत्वमिच्छादिनिष्ठत्वं वाऽऽदाय विनिगमनाविरहः । इच्छादेरस्थायित्वेन स्थायिधर्मान्तराश्रयत्वानुपपत्तेः । इदमेव धर्मान्तरं शाब्दीभावनेत्युच्यते ।

एवं 'न कलञ्जं भक्षयेत्' 'ब्राह्मणो न सुरां पिबे' दित्यादौ प्रवर्तनावन्निवर्तनापि लिङाद्यर्थः, साऽपि च पुरुषनिष्ठनिवृत्तिहेतुर्निवर्तयितुर्धर्मः 'अहमेनं निवर्तयामी'त्यनुभवसिद्धः । तद्विशेषाश्च प्रैषादयो लोके । धर्मान्तरञ्च निवारणानिषेधप्रतिषेधापरनामधेयं वेदे तथैव प्रसाध्यम् । तत्र त्वेतावान् विशेषः—न शुद्धो लिङादिः प्रवर्तनावन्निवर्तनामभिधत्ते । किन्तु नञ्समभिव्याहृत एव, तत्र नञो द्योतकत्वमात्रम् । लिङादेरेव तु निवर्तनायां शक्तिः, निपातोपसर्गाणां द्योतकत्वस्य व्युत्पत्तिसिद्धत्वात् । अथाऽपि तेषां वाचकत्वं स्यात्, तथाऽपि "तदन्यतद्विरुद्धतदभावेषु नञ्" इति स्मरणादभाववाचित्वेन क्लृप्तस्य नञो निवर्तनावाचित्वकल्पने मानाभावः । लिङादिसमभिव्याहाराभावे च घटो नास्तीत्यादौ निवर्तनाया अप्रतीतेः । तस्याप्रतीतद्योतकत्वकल्पने गौरवप्रसं-

गाच्च । "अमानोनाः प्रतिषेध" इति तु द्योतकत्वेनाऽप्युपपन्नम् । तदयमत्र वाक्यार्थः—कलञ्जभक्षणब्राह्मणकर्तृकसुराकर्मकपानादिभावनां प्रवृत्तिरूपामाख्यातवाच्यामुद्दिश्य लिङा तन्निवृत्तिफलका व्यापाररूपा निवर्तना विधीयते, नञस्तु प्रवृत्त्यभाववाचित्वेन प्रधानभूतभावनासम्बन्धेऽपि निवर्तनाद्योतकत्वमविरुद्धम् । शुद्धप्रवृत्तेश्चोद्देश्यत्वासम्भवात् हविरार्तिन्यायेन धात्वर्थतत्कारकयोरुद्देश्यान्तर्गतया कृतिविशेषणत्वस्य व्युत्पत्तिसिद्धत्वात् तद्विवक्षायामपि कर्तृकर्मादिकारकनिष्ठलिङ्गसंख्यादिविशेषणानामविवक्षा उद्देश्यविशेषणत्वादुपपन्ना ।

न च लिङः प्रवर्तनावाचित्वेन नञश्चाभाववाचित्वेन क्लृप्तस्य निवर्तनावाचित्वकल्पने गौरवापत्तेः प्रवर्तनाभाव एव निषेधाधिकारे वाक्यार्थोऽस्त्विति वाच्यम्; लिङ्निष्ठप्रवर्तनाभावबोधेऽपि रागादिना प्रवृत्तौ प्रत्यवायानापत्तिप्रसङ्गात् ।

न च रागादिनिष्ठप्रवर्तनाभाव एव वाक्यार्थः, तस्या लोके वेदे वा लिङादिवाच्यत्वेनाक्लृप्तेः, तत्रापि शक्तिकल्पने गौरवतादवस्थ्यापत्तेः ।

एतेन नञोऽभाववाचकस्यापि लिङादिसमभिव्याहारे सति निवर्तनावाचित्वम्, 'अमानोनाः प्रतिषेधे' इति प्रसिद्धेः, न तु लिङः प्रवर्तनावाचित्वेन क्लृप्तस्य, गौरवात् । अतश्च रागाद्यर्थप्राप्तां पानादिप्रवर्तनां लिङादिनोद्दिश्य नञा निवर्तना विधीयते इत्यपास्तम् । रागादिनिष्ठप्रवर्तनावाचित्वस्य लोके वेदे वा अक्लृप्तत्वेनानुवादायोगात्, स्वनिष्ठप्रवर्तनायाश्चाप्राप्तत्वेन लिङादिनाऽननुवादात् । विधाने वाक्यभेदो विकल्पापत्तिश्च । अत एवायं पक्षो वार्तिककृता "ते (ये) षा" मित्यादिनाऽन्यमतत्वेनोक्तः । केषांचित्त्वत्र स्वमतत्वप्रमितिर्भ्रम एव ।

वस्तुतस्तु—लिङोऽपि न निवर्तनायां शक्तिः, किन्त्वनुकूलव्यापारत्वे ऽखण्डोपाधौ वा । तत्र यथा नञोऽभावे प्रवृत्तिनिरूपितत्वं संसर्गः, एवं नञ्सत्त्वे प्रवृत्त्यभावनिरूपितत्वमिति न किञ्चित्कल्प्यम् । अत्रापि निवृत्तिहेतुत्वं नाम प्रवृत्त्यभावप्रयोजकत्वमेव, न तु निवृत्तिः पदार्थान्तरं, हेतुत्वं वा जनकत्वम् , प्रमाणाभावात् । प्रजोकत्वं च प्रवृत्त्यभावकारणीभूतानिष्टसाधनत्वानुमितिजनकज्ञानविषयत्वं पूर्ववत् । अनिष्टसाधनत्वज्ञानस्याभावकारणता च योगक्षेमसाधारणी, तत्त्वं चाभावप्रतियोगिप्रवृत्तिसामग्रीविघटकत्वम् । अनिष्टसाधनत्वे हि बुद्धेऽनिष्टबोधात्तद्गतं बलवत्त्वं झटिति बुध्यत इति बलवदनिष्टानुबन्धित्वज्ञानात्प्रवृत्तिकारणीभूतबलवदनिष्टाननुबन्धित्वज्ञानाभावप्रतिबन्धस्सुलभः । अतश्चात्रापि प्रवृत्तेस्तदभावस्यानुकूलत्वस्य चान्यत एव भानाल्लिङो नातिरिक्ता निषेधस्थले शक्तिः, किन्तु विधिसाधारण्येनाखण्डोपाधावेवेति सिद्धम् । तेन सिद्धा निषेधाधिकारेऽपि निवर्तनाविशेषरूपनिवारणापरनामधेया शाब्दी भावना । चेतनप्रवृत्तिनिवृत्त्योश्चेष्टानिष्टसाधनताज्ञानं विनाऽसम्भवात् विधिनिषेधाभ्यामिष्टानिष्टसाधनत्वं प्रवृत्तिनिवृत्तिविषयस्याक्षिप्यते । तयोश्च शाब्दीभावनयोर्भाव्यापेक्षायां आख्यातवाच्या प्रवृत्तिर्विधिरूपायाम्, नञ्वाच्या च तन्निवृत्तिः निषेधरूपायां भाव्यत्वेनान्वीयते । करणाकाङ्क्षायां च प्रेरणानिवारणयोः स्वरूपेण प्रवृत्तिनिवृत्तिजनकत्वायोगाल्लिङादिजन्यं तयोर्ज्ञानमेव करणम् । केचित्तु लिङ्भावनयोः सम्बन्धरूपशक्तिस्मरणमेव करणम् । भावनाज्ञानं त्ववान्तरव्यापार इत्याहुः । इतिकर्तव्यताकाङ्क्षायां च स्तुतिनिन्दयोरन्वयः । तथा हि—विधिनिषेधाभ्यमिष्टानिष्टसाधनत्वाक्षेपात्प्रवृत्तिनिवृत्तिहेतुभूतेच्छानिच्छोत्पत्तावपि तात्का-

लिकेष्टानिष्टसाधनत्वस्यापि प्रत्यक्षेणावगतेः द्वेषोत्साहसम्भवेन प्रवृत्तिनिवृत्त्यभावप्रसङ्गात्तदपनायकापेक्षायां लोके तदपनयन-शक्तत्वेनावगतस्य स्तुतिनिन्दाज्ञानस्यानुग्राहकत्वं परिकल्प्यते। ज्योतिष्टोमसुरापानादिरूपसाधनयोश्च द्वेषोत्साहौ हि निसर्ग-सिद्धौ। तन्निवर्तकत्वं च स्तुतिनिन्दयो रुचिद्वेषोत्पादनद्वारा बहु-क्षीरादिवाक्येषु लोकसिद्धमेव। अतस्स्तुतिनिन्दाप्रतिपादकापेक्षायां प्रयोजनापेक्षिणामर्थवादानामेव तल्लक्षकत्वं कल्प्यते। न च फल-पदेन वा प्रशस्तफलयुक्तत्वाद्विध्यादिपदेन वा निर्दोषविधि-निषेधविहितत्वादितिकर्तव्यतापदैर्वा विशिष्टेतिकर्तव्यताकत्वा-त्प्रशस्तोऽप्रशस्त इत्येवं तत्प्रतिपादनसम्भवः, तेषां श्रौतफलादि-परत्वेन लाक्षणिकस्तुतिनिन्दागमकत्वकल्पनानौचित्यात्। नच रात्रिसत्रन्यायेन फलादिपरत्वेऽप्याकांक्षितप्राशस्त्यादिकल्पना-परत्व सम्भवः। प्रयोजनाकांक्षिभिस्सन्निहितैरर्थवादैरेव तत्प्रति-पादनसम्भवेनानुपपत्त्यभावात्। यत्र तु सन्निधावर्थवादाभाव-स्तत्राप्यानुमानिकवचनातिदेशेन तत्प्राप्तिः।

ननु—नार्थवादानामतिदेशेन प्राप्तिः, सा हि प्रयाजाद्यतिदे-शेन वा स्यात्? भिन्नेन वा? नाद्यः, अर्थभावनाया इतिक-र्तव्यताकांक्षया कल्पितेनातिदेशेन प्राप्तानां प्रयाजादीनामर्थभा-वनासम्बन्धोत्तरकालमंशत्रयविशिष्टभावनावगमे सति विधिप्र-वृत्तौ प्राशस्त्यापेक्षायां विरम्यव्यापारत्वेन क्लृप्तातिदेशस्य त-त्प्रापकत्वानुपपत्तेः। नान्त्यः; विधेरेव प्रवर्त्तनावाचकस्यापि रात्रिसत्रन्यायेन प्राशस्त्यादिपरत्वोपपत्तौ स्वतन्त्रातिदेशकल्पने गौरवात् इति चेत्? प्रयाजादिप्राप्तेः पूर्वमप्युत्पत्तिवाक्य इष्टसा-मान्यवदितिकर्तव्यतासामान्येनाप्यंशत्रयवैशिष्ट्योपपत्त्या विधे-र्भावनासम्बन्धोपपत्तौ तस्य प्राशस्त्यापेक्षायामवश्यकल्प्येनैके-

नैवातिदेशेनोभयप्राप्त्युपपत्तौ विधेः प्राशस्त्यपरत्वकल्पनायां प्रमाणाभावात् ।

न च—शाब्दभावनायास्साद्दश्याभावः । निर्वपतिधातुमद्वाक्यसम्बन्धित्वरूपस्य शब्दसाद्दश्यस्यार्थभावनायामिव शब्दभावनायामपि तुल्यत्वात् ।

नचैवं विश्वजिति ज्योतिष्टोमिकार्थवादातिदेशे सति तत एव (१)रात्रिसत्रन्यायेनार्थवादिकफलकल्पनोपपत्तौ विश्वजिन्न्यायभङ्गप्रसङ्गः । अप्राकृतकार्यकारित्वप्रसंगेनार्थवादानां फलकल्पकत्वानापत्तेः ।

न च फलाकांक्षायां सत्यामप्राकृतकार्यकारित्वं न दोषः। यूपावटास्तरणबर्हिषोऽपि धर्माकांक्षायां बर्हिर्धर्माणां तत्कल्पनापत्तेः ।

अथ तत्र लौकिकोपायाक्षेपकल्पनात्तन्निवृत्तिः, तदा प्रकृतेऽपि स्वर्गकल्पनयेति तुल्यम् । अस्तु वा यदि ज्योतिष्टोमे फलविधिसरूपार्थवादश्रवणं तदा विश्वजित्यतिदेशप्राप्तार्थवादिकफलकल्पनम्। सर्वथा विश्वजिति स्वर्ग एव फलम्। तदधिकरणन्यायस्तु (२)पिण्डपितृयज्ञादिविषयो भविष्यतीति न किंचिदनुपपन्नम् । तन्त्ररत्नन्यायसुधयोस्तु प्राशस्त्यानतिदेशकथनेऽभिप्रायं न विद्मः ।

एवं नामातिदेशेऽपि नाम्नाऽग्निहोत्रधर्माणामन्येषामिव प्राशस्त्यस्यापि तद्धर्मस्य लक्षणया प्राप्तिर्द्रष्टव्या । (३)"एतद्ब्राह्मणा-

---

१. रात्रिसत्रन्यायश्चतुर्थाध्यायस्य तृतीयपादेऽष्टमाधिकरणे द्रष्टव्यः।

२. "अमावास्यायामपराह्णे पिण्डपितृयज्ञेन चरन्ति" इति पिण्डपितृयज्ञविधायके वाक्ये फलाश्रवणात् सन्निधावर्थवादाभावाच्च रात्रिसत्रन्यायाप्रवृत्तेः अपूर्वत्वाच्च प्रकृतितोऽर्थवादातिदेशस्याप्यभावात् स्वर्गवाचकफलकल्पनेनैव तत्र फलाकाङ्क्षा शमनीयेति भावः॥

३. तै. ब्रा. १. ७. १.

नि पञ्च हवींषि" इत्यादौ वचनातिदेशे तु तत्प्राप्तिरविवादैव। यत्र तु प्रकृतावेव दर्वीहोमेषु चोपदेशातिदेशयोरभावस्तत्र विधेरेव प्राशस्त्यापेक्षत्वात्तस्यैव प्राशस्त्यकल्पकत्वमपि रात्रिसत्रन्याये-नोचितम्, न तु फलादिपदानाम्, तेषां तदनपेक्षत्वात्। यत्र तु सन्निधावर्थवादाः पठितास्तत्र विधेरुभयपरत्वकल्पने प्रमाणाभा-वादर्थवादा एव प्रयोजनापेक्षा लक्षणया प्राशस्त्यमप्राशस्त्यं वा विधिनिषेधापेक्षितं प्रतिपादयन्ति। तच्च प्राशस्त्यमप्राशस्त्यं वा रुच्यरुचियोग्यत्वरूपं निर्वाच्यम्। रुच्यरुचियोग्यत्वज्ञानस्यापि प्रवृत्तिनिवृत्तिप्रतिबन्धकरुच्यरुचियोग्यत्वज्ञानाविरोधित्वेन प्रवृ-त्तिनिवृत्त्युपयोगित्वात्। तत्त्वं च बलवदनिष्टाननुबन्धित्वानु-बन्धित्वयोग्यत्वम्। तज्ज्ञानस्य च प्रवृत्तिनिवृत्तिकारणत्वमविवाद-मेव। अत उक्तविधमेव प्राशस्त्यमप्राशस्त्यं वा सर्वत्रार्थवादैर्ल-क्ष्यते। योग्यतावच्छेदकीभूताः परं गुणदोषाः क्वचित् "वायुर्वै क्षेपिष्ठा" इत्यादौ शक्त्या प्रतिपाद्यन्ते, क्वचित्तु "यजमानः प्र-स्तरः" इत्यादौ गौण्यादिनेति विशेषः। रुच्यरुचियोग्यत्वरूप-प्राशस्त्याप्राशस्त्यलक्षणा तु सर्वत्राविशिष्टेति ध्येयम्॥

वाक्ये चेयं लक्षणा, नैकस्मिन्पदे, इतरपदानां वैयर्थ्या-पत्तेः। तेषां तात्पर्यग्राहकत्वकल्पने च विनिगमनाविरहः। ल-क्षणाप्रकारश्च गुणवादसूत्रे स्पष्टीकरिष्यते। तच्च प्राशस्त्यम-प्राशस्त्यं वा शाब्दभावनयैवान्वेति—'यागेन स्वर्गं भावयेत्प्रशस्त-त्वात्, 'न सुरां पिबेदप्रशस्तत्वा'दिति। अतश्च विध्यर्थवादयो-रेकवाक्यत्वसिद्धिः। तत्रापि पदैकवाक्यतैव, विध्यर्थवादानां स्वस्वार्थबोधे सामान्यभावादित्युत्तराधिकरणे वक्ष्यते। अतश्चा-र्थवादसत्त्वेऽर्थवादप्ररोचितमेव कर्माभ्युदयकारीत्यध्ययनविधि-वशेन कल्पनान्नान्यत्प्ररोचनं कर्माङ्गमित्यपि नियमसिद्धिः। य-

त्रापि केवलार्थवादश्रवणं तत्रापि विधिकल्पनया प्रामाण्योपपत्ति(१)रौदुम्बराधिकरणे वक्ष्यते ।

तस्मात्सिद्धं साधनेतिकर्तव्यताविषयद्वेषोत्साहनिवर्तकस्तुतिनिन्दालक्षकत्वमर्थवादानां, न तु स्वार्थपरत्वमपि, प्रमाणाभावात्; युगपद्वृत्तिद्वयविरोधापत्तेश्च । एवं च यत्र सुखनरकादिरूपफले निसर्गत एव रुच्यरुची, तत्र प्रयोजनाभावात्,

"यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम् ।
अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदम्" ॥

इत्यादीनां न प्राशस्त्याप्राशस्त्यलक्षकत्वं, किन्तु विधिनिषेधापेक्षितस्वर्गनरकादिस्वरूपपरत्वमेव ।

एवं दूरस्थानामपि विनाशिदेहादिव्यतिरिक्तनित्यकर्तृभोक्तृरूपात्मप्रतिपादिकानामुपनिषदां परलोककर्मविध्यपेक्षितोक्तरूपात्मपरत्वमेव । उक्तविधात्मज्ञानस्य चानाराभ्याधीतस्यापि सामर्थ्यात्(२)"यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति" इति वाक्याद्वा क्रत्वङ्गत्वाविरोधः । असंसारिसगुणनिर्गुणात्मप्रतिपादिकानां तूभयविधोपासनाविध्यपेक्षितत्वेन स्वार्थपराणामेवाभ्युदयनिःश्रेयसहेतुत्वमिति वार्तिके व्याकरणाधिकरण उपपादयिष्यते । तेन सिद्धमर्थवादानां प्रामाण्यम् ।

सूत्रं तु–विधीनां विधेयानां, स्तुत्यर्थेन स्तावकत्वेन, विधिनैकवाक्यत्वसम्भवादर्थवादाः प्रमाणं स्युरिति व्याख्येयम् ॥ ७ ॥

तुल्यं च सांप्रदायिकम् ॥ १–२–८ ॥

किंश्चाध्ययनधर्माणां स्वाध्यायानध्यायपरिपालनादीनां

---

१. अनन्तराधिकरणे । २. छन्दोग्य. १. १. १०.

यथा प्रमाणभूतविध्यध्ययने क्रियमाणेऽनुष्ठानं वैदिकानाम्, तथार्थवादाध्ययनेऽपि। तेषां हि न स्वातन्त्र्येण पुरुषार्थत्वम्, फलाश्रवणात्।

(१)"तपोविशेषैर्विविधैर्व्रतैश्च श्रुतिचोदितैः।
वेदः कृत्स्नोऽधिगन्तव्यस्सरहस्यो द्विजन्मना"॥

इति स्मरणेन धर्माणामध्ययनाङ्गत्वावगमाच्च। न चाध्ययने तत्कार्ये वार्थज्ञाने धर्माणामनुपयोगेनानर्थक्यात्तत्पूर्वकज्योतिष्टोमादिकर्माङ्गत्वं वक्तुं शक्यम्, वाक्यप्रकरणाभ्यामध्ययनाङ्गत्वेनावधारितानां धर्माणां क्रत्वङ्गत्वे प्रमाणाभावात्। उपयोगस्त्वध्ययन एव विघ्ननिवृत्त्यर्थत्वेनोपपन्न इति द्वादशे वक्ष्यते। तेनाप्रामाण्येऽर्थवादानां तदध्ययनमध्ययनाङ्गधर्मानुष्ठानं च साम्प्रदायिकपदाभिधेयं विधिवदनुष्ठीयमानमनुपपन्नं स्यात्, अतस्तद्वदेव प्रमाणम्।

अथवा—पूर्वपक्षिणाऽप्रामाण्येऽप्यर्थवादानामध्ययनस्यादृष्टार्थत्वाङ्गीकारात्, धर्माणामपि प्रयाजादिवद्वा विघ्नसमाप्त्यर्थत्वेन वाऽध्ययनाङ्गत्वोपपत्त्या पूर्वव्याख्याया अयोगेऽपि अर्थवादानामर्थपरत्वाभावेऽदृष्टार्थस्याध्ययनस्य (२)सर्वौषधावघातवत्सकृत्प्रयोगापत्तेःआवृत्तेरविस्मरणप्रयोजनाभावेन च धारणाध्ययनस्य साम्प्रदायिकपदाभिधेयस्यानुपपत्तिः। प्रयोजनवदर्थपरत्वे हि व्रीह्यवघातवदावृत्तिर्धारणाध्ययनं च विधावित्रोपपद्येत। तस्मात्तद्वदेवार्थपरत्वम्। सूत्रं व्याख्यातम् ॥८॥

अप्राप्ता चानुपपत्तिः प्रयोगे हि विरोधस्स्यात् शब्दार्थस्त्वप्रयोगभूतस्तस्माद्उपपद्यते ॥१-२-९॥

---

१. मनु २-१६५.   २. सर्वौषधावघातश्चयने विहितः।

अनेन सूत्रेण पूर्वपक्ष्युक्तानां शास्त्रविरोधादीनां सामान्यतः परिहारोऽभिधीयते । या शास्त्रविरोधादिकाऽनुपपत्तिस्साऽस्मत्पक्षमप्राप्ता, प्रयोगे अनुष्ठाने हि, स्तेयादीनामुच्यमाने, विरोधस्स्यात, अस्माकं मते पुनः शब्दस्य श्रौतोऽर्थः, अप्रयोजनभूतः, उत्तरसूत्रोक्तरीत्याऽविवक्षित इति यावत् । अथवा-शब्दस्य विधेः, अनुग्रहार्थस्सन्नयमर्थवादः, अप्रयोगभूतः प्रयोगमप्राप्तः, न प्रयोगं विधत्त इति यावत् । तस्मात्प्रामाण्यमुपपद्येत । विधिकल्पकत्वे श्रौतार्थपरत्वे वा भवदुक्तदोषास्स्युः, न तु स्तुत्यर्थत्व इति भावः । 'अप्राप्ताश्चानुपपत्ति' मिति पाठे याऽनुपपत्तिस्तामप्राप्तां मन्यामह इत्यध्याहारः । 'अप्राप्तं चानुपपत्ति' मिति पाठे त्वस्मद्व्याख्यानमनुपपत्तिमप्राप्तमिति व्याख्येयम् ॥ ९ ॥

गुणवादस्तु ॥ १-५-१० ॥

ननु-(१)"स एवैनं भूतिं गमयति," इत्यादिभिः पदैः स्तुतिप्रतीतावपि "वायुर्वै क्षेपिष्ठा" इत्यादिभ्यस्तदप्रतीतेः कथं तेषां स्तावकतासम्भवः ?

उच्यते-गुणागुणरूपस्तुतिनिन्दावादस्तु सर्वत्र यथासम्भवं कल्प्यः, कारणानुरूपत्वात्कार्यस्य, क्षिप्रदेवतासाध्यं कर्म क्षिप्रमेव फलं दास्यतीति सर्वेषामपि पदानां स्तुत्युपपादकत्वेनाविरोधात् ।

एवं-(२)"सोऽरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वं, यदश्रु व्यशीर्यत तद्रजतमभवत्, पुराऽस्य संवत्सरात् गृहे रोदनं भवति, तस्माद्बर्हिषि रजतं न देयम्" इत्यत्रापि बर्हिश्शब्दलक्षिते यज्ञे "यथा

---

१. तै. सं. २. १. १. २. तै. सं. १. ५. १.

श्रद्धं दक्षिणां ददाति" इत्यादिसामान्यविहितदक्षिणाके स्वे-च्छाप्राप्तरजतदाननिषेधस्यायमर्थवादः । तत्र स इति तच्छब्देन "तदग्निर्न्यकामयत" इति पूर्वोपक्रान्तोऽग्निः परामृश्यते । 'तद्र-जतमित्यत्र तच्छब्देनाश्रु, अत्र "पुरास्य संवत्सरा" दिति रजतदाननिन्दा । तदुपपत्तिश्च 'सोऽरोदी'दित्यादिः । कार-णानुरूपत्वात्कार्यस्य रोदनप्रभवरजतदानाद्रोदनं भवतीति रज-तदाननिन्दा । अतो रजतदाननिषेधे दोषाभावरूपगुणवादोप-पत्तिः । न च—रुद्ररोदनरजताश्रुप्रभवत्वसंवत्सररोदनादीनां प्रमाणाभावात्प्रत्यक्षविरोधाच्च निरालम्बननिन्दानुपपत्तिः । गौण्या वृत्त्या सर्वत्रालम्बनोपपत्तेः । तथाहि—रुद्रशब्दस्तावद्व्या-करणे रोदनकर्तृवाचित्वेन व्याख्यातः । स च "रुद्रमग्निं प्रजाः प्राहुः" इत्यरुदत्यप्यग्नौ रूढ्यां प्रयुक्तः, तत्र च तत्सि-द्धिसूत्रोक्तन्यायेन रुद्रशब्दाभिधेयत्वसादृश्याद्रोदनकर्तृत्वमुपच-र्यते, अश्रुणश्च चक्षुर्ग्राह्यवर्णसारूप्यादन्यत्र च कार्ये समवायि-कारणसादृश्यदर्शनाद्रजते तत्प्रभवत्वोपचारः । धनत्यागेन चात्यन्तोदारस्यापि गृहे दुःखदर्शनात्तत्सामान्येन रोदनोप-न्यासः ।

अत एवासत्यार्थप्रतिपादनादप्रामाण्यं नाशङ्क्यम् , अस-त्यार्थे तात्पर्याभावात्; तात्पर्यविषयीभूतायाश्च निन्दाया-स्सत्यत्वात् । असत्यार्थोपादानं तु लक्षणोपायत्वेन साधुत्वोपा-यत्वेनैवाऽसत्यस्त्रिबाद्यन्वाख्यानं न विरुद्ध्यते । न ह्युपाख्यानं स्वरूपसत्प्राशस्त्याप्राशस्त्यज्ञान उपयुज्यते, अपि तु तज्ज्ञानम् । अतश्च रज्ज्वां सर्पज्ञानस्येव भयकारणत्वमसत्योपाख्यानज्ञा-नस्य प्राशस्त्याप्राशस्त्यज्ञानकारणत्वं, तस्य च प्रवृत्तिनिवृत्ति-हेतुत्वं न विहन्यते । यत्र हि न ज्ञानमात्रेणोपयोगः, यथा अर्थ-

भावनांशेषु, तत्रापि ज्ञानमात्रोपयोगे वेदस्य निष्फलत्वेनाप्रामाण्यापत्तेस्तत्रार्थ एव तात्पर्यात्तत्सत्यत्वाश्रयणम् । शब्दभावनांशेषु तु ज्ञानमात्रोपयोगा(१)न्न सर्वांशोपायसत्यत्वादरः ।

अत एव लोकेऽर्थासत्यत्व एव स्तुतिबुद्धिः, अर्थसत्यत्वे तु वक्तारो भवन्ति-कात्र स्तुतिर्निन्दा वा सत्यमेवैतदिति । सत्यपि चार्थासत्यत्वज्ञाने प्राशस्त्याप्राशस्त्यज्ञानस्य वेदकृतत्वात्प्रवृत्तिनिवृत्तिजनकत्वोपपत्तिः । अत एव लोके मेधादिहेतुभूते वचादिभक्षणे मेधाद्यनिच्छन्तं पुरुषं प्रवर्तयितुं तदभिप्रेतं सौभाग्यमसत्यमप्युपन्यस्य तं नियुङ्क्ते । सोऽपि च सौभाग्यासत्यतां जानन्नपि सर्वथा मामयं पुरुषार्थे प्रवर्तयतीति ज्ञात्वा प्रवर्तत एवेति सर्वस्वसंवेद्यम् । तस्मादेवमादौ शक्यार्थासत्यत्वेऽपि गौण्या वृत्त्या कथञ्चिदर्थसत्यत्वमापाद्य लक्षणया निन्दोपपत्तेः प्रामाण्यं सिद्धम् । एवं स्तुत्यर्थवादेष्वप्यर्थसत्यत्वानादरो द्रष्टव्यः । एवं यत्रापि अन्यद्विधौ, अन्यच्चार्थवादे संकीर्त्यते, यथा(२) "वेतसशाखयाऽवकाभिश्चाग्निं विकर्षति" इति, "आपो वै शान्ताश्शान्ताभिरेवास्य शुचं शमयति" इति च, तत्राप्यपां स्तुत्याऽब्जन्यानां वेतसावकानां स्तुतिर्लक्षितलक्षणया न विरुद्ध्यते ।

सूत्रं तु-तत्सिद्धिसूत्रोक्तरीत्या गौणवृत्तिप्रकाररूपो गुणवादः स्तुतिहेतुर्ज्ञेय इति व्याख्येयम् ॥ १० ॥

रूपात्प्रायात् ॥ १-२-११ ॥

अतः परं पूर्वपक्ष्युक्तस्तेनाद्युदाहरणेषु तत्सिद्धिसूत्रोक्तगौणवृत्तिप्रकारनिरूपणार्थानि सूत्राणि ।

तत्र -"हिरण्यं हस्ते भवति, अथ गृह्णाति" इत्यस्य विधे-

---

१. सर्वत्रांशोपायेति० ख. ग. पु. २. तै. सं. ५. ४. ४.

श्शेषः "स्तेनं मनोऽनृतवादिनी वाक्" इति । अत्र वाङ्मनसयोर्निन्दा हिरण्यस्तुत्यर्था । अत्यन्तप्रशस्तयोरपि हि वाङ्मनसयोः स्तेनानृतवादयोगाद्धिरण्यादूनत्वम् । अतो 'न हि निन्दा निन्दितुं प्रवर्ततेऽपि तु विधेयं स्तोतुं', इति न्यायेन हिरण्यस्तुतिः, न तु निन्दया स्वतन्त्रनिषेधोन्नयनम् । निषेधैकवाक्यताविरहे निन्दात्वस्यैवासिद्धेः क्लृप्तविध्येकवाक्यत्वसम्भवे वाक्यभेदापादकनिषेधोन्नयनस्यान्याय्यत्वाच्च । मनसश्च स्तेनस्येव प्रच्छन्नरूपत्वात्तत्कार्यकारित्वं गौणतानिमित्तम् । । वाचश्च प्रायशोऽनृतवादिनीत्वाद्भूमा ॥ ११ ॥

दूरभूयस्त्वात् ॥ १–२–१२ ॥

"धूम एव" इत्यादिः,(१) "तस्माद्दिवाग्निरादित्यं गतो रात्रावादित्यस्तं" इत्यादिश्चोपपाद्योपपादकरूपेण सर्वोऽर्थवादः(२) "अग्निर्ज्योतिर्ज्योतिस्सूर्यस्स्वाहा" इत्यादि(३)मिश्रलिङ्गकमन्त्रविधेश्शेषः । उभयोर्देवतयोरेकत्र सन्निधानेन चोभयदैवत्यहोमस्तुतेरुपपत्तिः ।

वस्तुतस्तु केवललिङ्गकमिश्रलिङ्गकमन्त्रविध्योर्मध्येऽयं पठितोऽपि मिश्रलिङ्गविधेः(४) "उभाभ्यां सायं हूयते, उभाभ्यां प्रातः, न देवताभ्यस्समदं दधाति" इत्यर्थवादान्तराम्नानात्, 'अग्निर्ज्योतिर्ज्योतिरग्निस्स्वाहेति सायं जुहोति" इत्यादेः केवलमन्त्रविधेरेवायं शेषः—यस्माद्दिवाग्नेरदर्शनादादित्यान्तर्गतिस्सूर्यस्यैव चातो ज्योतिष्ट्वं, एवं रात्रावप्यग्नेः । अतः केवलदैवत्यावेव युक्ताविति । दूरस्थस्य च भूयस्त्वेन यद्दर्शनं तद्दूरदर्शिना लक्षयि-

१. तै. ब्रा. २. १. २-९. २. तै. ब्रा. २. १. २. १०.
३. अग्निसूर्ययोरुभयोः प्रतिपादनान्मिश्रत्वम् ॥ ४. तै. ब्रा. २. १. २. १०.

त्वा तद्विषयत्वाभावोऽग्न्यादौ नञा बोध्यत आदित्थं स्तोतुमिति पूर्ववत् भूमैवात्र गौणवृत्तिनिमित्तम् ।

वस्तुतस्तु—'न ददृश' इति वाक्यस्य मुख्यो दर्शनाविषय आकाशादिरित्यर्थः । तद्गतस्य दूरस्थवृत्तिभूयस्त्वप्रकारकदर्शनाविषयत्वरूपस्य गुणस्यैकसम्बन्धिदर्शनेनापरसम्बन्धिस्मरणमिति न्यायेनोपस्थितस्याग्न्यादौ योगादेव गौणत्वोपपत्तेर्न गुणांशेऽपि लक्षणेति तत्त्वम् । एवमेव गौण्युपपत्तिस्सर्वत्रोपपादनीया ॥ १२ ॥

स्त्र्यपराधात्कर्तुश्च पुत्रदर्शनम् (नात्) ॥ १-१-१३ ॥

"न चैतद्विद्म" इत्ययं प्रवरानुमन्त्रणमन्त्रनिषेधशेषः । अब्राह्मणस्यापि प्रवरानुमन्त्रणेन ब्राह्मण्यं भवतीत्येतत्स्तुत्यर्थमुपपादयितुं स्वस्यैव ब्राह्मणत्वाज्ञानोपन्यासः । पूर्ववच्चात्रापि ज्ञानगतं प्राशस्त्यं 'विदि' धातुना लक्षयित्वा तद्विषयत्वं नञा ब्राह्मणत्वे प्रतिषिध्यते । लक्षणां विना चोपपत्तिः पूर्ववत् । सम्भवति हि ब्राह्मणत्वस्य दुर्ज्ञानत्वं, मातुर्व्यभिचाररूपापराधसम्भवात् । नचापराधेऽपि(१) "बीजाद्योनिर्बलीयसी" इति प्रसिद्धेर्मातृजात्यैव जातिनिश्चयः, "माता भस्त्रा पितुः पुत्रो (यस्माज्जा) येन जातस्स एव सः" इति बीजावापकर्तुः पुत्रस्सम्भवतीति स्मरणात् तस्य च नानाजातित्वोपपत्तेर्निश्चयायोगात् । अत एव क्षेत्रिजात्यापि न व्यभिचारोत्पन्ने जातिनिश्चयः । अतश्च ब्राह्मणत्वस्य दुर्ज्ञानत्वादज्ञानवचनं गौणं, प्रशंसा च गौणी निमित्तम् ॥ १३ ॥

आकालिकेप्सा ॥ १-२-१४ ॥

"को हि तद्वेद" इत्ययं प्राग्वंशे(२) "दिक्ष्वतीकाशान् करोति"

---

१. मनुस्मृ. ९. ५२. २. तै. सं. ६. १. १.

इत्यस्य विधेश्शेषः । सर्वस्य हि सद्यः फलं यथाभिमतं न तथा कालान्तरभावि । अतश्चातीकाशकरणं सद्यो धूमनिर्गमफलकत्वेन प्रशंसितुं कालान्तरभाविस्वर्गनिन्दा । अत्र ऐहिकवदभिमततरत्वरूपमाशस्त्यमेवामुष्मिकफलपरामर्शिना तच्छब्देन तद्गतं लक्षयित्वा तस्यानवक्लृप्तिः "को हि तद्वेद" इत्यनेनोच्यत इति प्रशंसैव गौणीवृत्तिनिमित्तम् । (लक्षणाभावो वा पूर्ववत्)

सूत्रं तु-यत्तदानीमेवोत्पद्यते तदाकालिकं, तस्यैव चेप्सा सर्वस्याभिमता, अतस्तामभिप्रेत्यायं गुणवाद इति । अकालिकमिति पाठेऽपि, काले विप्रकर्षे, भवं कालिकं, न कालिकमकालिकमिति व्युत्पत्त्या च स एवार्थः ॥ १४ ॥

विद्याप्रशंसा ॥ १-२-१५ ॥

"शोभतेऽस्य मुखं" इत्यादिश्च गर्गत्रिरात्रविधेश्शेषस्तत्स्तुत्यर्थः, यज्ज्ञानस्याप्येवं फलं, किमुत तस्य गर्गत्रिरात्रस्येति । शोभत एव हि शिष्यैरुद्वीक्ष्यमाणं ज्ञातुर्गुरोर्मुखम् । अतस्तदनुवादोऽयं प्रशंसार्थः, न तु ज्ञानफलं; तस्य सामर्थ्यात् क्रत्वर्थकर्तृसंस्कारकत्वेन फलानपेक्षत्वस्य त्वयैवोक्तत्वात् । यद्यपि चेयं न शोभापदाभिधेया, लावण्यादेरेव तत्पदवाच्यत्वेन लोकप्रसिद्धत्वात्, तथापि प्रीतिजनकत्वेन तत्कार्यकारित्वाद्गौण्या तदभिधानम् ।

सूत्रं-या विद्या फलहेतुत्वेनोक्ता सा प्रशंसेति व्याख्येयम् ॥ १५ ॥

सर्वत्वमाधिकारिकम् ॥ १-२-१६ ॥

"पूर्णाहुत्या सर्वान्" इत्यादयोऽर्थवादाः पूर्णाहुत्यादिवि-

धीनां शेषाः, न तु स्वतन्त्रफलविधयः, पूर्णाहुत्यादीनां त्वदुक्तरीत्यैव फलानपेक्षत्वात् । सर्वकामावाप्तिवचनं च सर्वकामजनककर्माधिकारसम्पादनाद्गौणम् । पूर्णाहुत्यादौ कृत एव हि तत्तदुत्तरकर्माधिकारः । यद्यपि चेहैव सर्वशब्दानुरोधात्सुरकन्यागमनादिजनककर्माधिकारः कथमप्यसम्भवी, तथापि सर्वमोदनं भुञ्जत इतिवत्सर्वत्वमाधिकारिकं सम्भवमात्रापेक्षमित्यर्थः ॥ १६ ॥

फलस्य कर्मनिष्पत्तेस्तेषां लोकवत्परिमाणतः फलविशेषस्स्यात् ॥ १-२-१७ ॥

यद्यपि च पूर्णाहुत्यादेस्सर्वफलसाधनत्वं स्यात्, तथापि नान्यानर्थक्यम्, कर्मतारतम्येन फलतारतम्योपपत्तेः । अवश्यं चान्यत्राप्यग्निहोत्रदर्शपूर्णमासादिष्वेकफलकेषु कर्मस्वल्पेनैव महतःफलस्याप्तौ महति कर्मणि समानपरिमाणत्वेऽपि निस्सारशमीमयत्वादिनैव तदाप्तौ ससारहिरण्मयस्रुक्करणे मन्त्राद्यनुपपत्तेर्विधिवैयर्थ्यप्रसङ्गात्फलतारतम्यं कल्प्यम् । दृष्टं च लोकेऽपि वृष्ट्यादितारतम्येन फलतारतम्यम् । "ब्रह्महत्याश्वमेधाभ्यां न परं पुण्यपापयोः" इति स्मरणं, "यदग्निहोत्रं जुहोत्यथ गृहमेधिनमाप्नोत्येकया रात्र्या, अथ दशसंवत्सरानग्निहोत्रं जुहोत्यथ दर्शपूर्णमासयाजिन आप्नोति", इत्याद्यर्थवादाश्चामुमेवार्थं गमयन्ति ॥ १७ ॥

अन्त्ययोर्यथोक्तम् ॥ १-२-१८ ॥

शुद्धपृथिवीचयननिषेधो "हिरण्यं निधाय चेतव्य" मित्यस्य विधेर्नहिनिन्दान्यायेन स्तुत्यर्थो नित्यानुवादो वाङ्मनसयोरिव । तदुपपादकत्वेन चेतरावपि प्रतिषेधौ नित्यानुवादौ । यथा

चान्तरिक्षे दिवि वा चयनं न प्रसिद्धं, तथा हिरण्यरहितायां पृथिव्यामपीति हिरण्यस्तुतिः। अनित्यसंयोगस्तु अर्थवादप्रामाण्ये स्थापिते "परन्तु श्रुतिसामान्यमात्रं" इत्यनेन न्यायेन बबरशब्दस्य शब्दानुकारित्वं प्रावाहणिशब्दस्य च प्रकर्षेण वहतीति व्युत्पत्तिमङ्गीकृत्य नित्यवायुपरत्वाङ्गीकारात्तस्य च वाक्छब्दलक्षितध्वनिमात्रप्रवदनकामयितृत्वेन स्तुत्युपपत्तेः परिहृतः॥

प्रयोजनं तु—

(१)रात्रिसत्रे प्रतिष्ठा स्या(२)दञ्जने घृतसंस्थितिः।
(३)तथा श्येनादिशब्दानां नामता भेदकारणम्॥
(४)वारुणेष्ट्यां तथा दानं (५)वमनं वैदिकं तथा।

---

(१) 'प्रतितिष्ठन्ति ह वै य एता रात्रीरुपयन्ति' इत्यर्थवादबलादेव रात्रिसत्राख्ये कर्मणि प्रतिष्ठाख्यं फलमिति निर्णीतं चतुर्थतृतीये। (४-३-६)

(२) 'अक्ताश्शर्करा उपदधाति' इत्यत्र शर्कराणामञ्जनं केन द्रव्येणेत्यपेक्षायां स्वसन्निधिपठिते 'तेजो वै घृतं' इत्यर्थवादे घृतस्यैव स्तवनाद्विधिस्तुत्योरेकवाक्यत्वसिध्यर्थं पूर्ववाक्ये घृतस्यैव विधेयत्वमङ्गीकृत्य तेनैवाञ्जनमिति निर्णीतं प्रथमचतुर्थे। (१-४-१९)

(३) 'श्येनेनाभिचरन्यजेते'त्यादौ श्येनपदस्य विधेयगुणसमर्पकत्वं उत कर्मनामधेयत्वमिति सन्देहे 'यथा वै श्येनो निपत्यादत्ते एवमयं द्विषन्तं भ्रातृव्यं निपत्यादत्ते यमभिचरति श्येनेन' इत्यर्थवादे श्येनसादृश्योक्तिबलादेव विधिगतस्य श्येनपदस्य कर्मनामधेयत्वमुररीकृतं प्रथमचतुर्थे। (१-४-५)

(४) 'यावतोऽश्वान्प्रतिगृह्णीयात्तावतो वारुणान् चतुष्कपालान्निर्वपे' दित्यत्राश्वप्रतिग्रहीतुरेवाश्वसमसङ्ख्याकेष्टिप्रतीतावपि उपक्रमस्थार्थवादे 'प्रजापतिर्वरुणायाश्वमनयत्स स्वां देवतामार्छत्' इत्यादिनाऽश्वदातुरेव वरुणग्रहरूपजलोदरप्राप्तेः इष्टिकरणेन च तन्निवृत्यभिधानात्तदनुसारेण दातुरेवेयमिष्टिः, न प्रतिग्रहीतुः, इति निर्णीतं तृतीयचतुर्थे। (३-४-१४)

(५) 'वि वा एष इन्द्रियेण वीर्येणर्ध्यते यस्सोमं वमिति यस्सो-

(१)सोमयागपरत्वं च ज्योतिष्टोमपदस्य यत् ॥
(२)निवेशनं च धाय्यानामिध्यमानऋगुत्तरम् ।
(३)सोमविद्याप्रजानां च नित्यत्वं षष्ठुसंस्थितम् ॥

सवामी स्यात्तस्मा एतं सोमेन्द्रं श्यामाकञ्चरुं निर्वपेत्' इति वाक्यविहिता श्यामाकेष्टिः यागाङ्गद्रव्यसंस्कारकत्वेन विहितभक्षणविशिष्टसोमस्य वमने कर्तव्या ? उत लौकिकस्य वमनविरेकार्थमेव पीतस्य सोमस्य वमन इति संशये उपक्रमस्थार्थवादे सोमवमनकर्तुरिन्द्रियवीर्यव्यृद्धिरूपदोषश्रवणात्तस्य च लौकेऽभावेन वैदिकसोमवमन एव कस्यचनादृष्टस्य दोषस्योत्पत्त्यङ्गीकारावश्यंभावेन तन्निर्घातार्थवैदिकसोमवमन एवेयमिष्टिः, न तु लौकिके इति सिद्धान्तितं तत्रैव ।

(१) 'ज्योतिष्टोमेन स्वर्गकामो यजेत'त्यत्र ज्योतिष्टोमपदस्य 'त्रिवृत्पञ्चदशस्सप्तदश एकविंशः, एतानि वाव तानि ज्योतींषि, य एतस्य स्तोमाः' इत्यर्थवादबलात् त्रिवृदादिस्तोमचतुष्टयवत्सोमयाग एव वाच्योऽर्थः इति निर्णीतं चतुर्थचतुर्थे । (४-४-१२)

२. प्रकृतौ दर्शपूर्णमासयोस्सामिधेनीनां पञ्चदशत्वमुक्तम् । विकृतौ च तदधिका सप्तदशैकविंशत्यादिका सङ्ख्योक्ता । तत्र संख्यासम्पत्त्यर्थं तावत्य ऋचः दाशतयीभ्यस्समानेयाः । आनीयमानानामृचामाद्यावन्ते मध्ये वा यत्र कुत्रचिदनियमेन वा समावेशः इति संशये 'इयं वै समिध्यमानवती असौ समिद्धवती, यदन्तरा तद्धाय्या' इत्यर्थवादे समिद्धमानवतीसमिद्धवत्योरन्तराल एव धाय्याशब्दशब्दितानां निवेशकथनात्तदनुसारेण तत्रैव निवेशो धाय्याशब्दवाच्यानाम् । इतरासां त्वन्ते इति निर्णीतं पञ्चमद्वितीये । इध्यमानऋक् 'समिध्यमानोऽध्वरे' इति इध्यमानपदघटिता प्राकृतसामिधेनीषु ऋक्षु नवमीऋक् । इयमेव च समिध्यमानवती । 'समिद्धो अग्न आहुत देवान् यक्षि स्वध्वर' इति समिद्धपदघटिता समिद्धवती दशमी ॥ (५-३-३)

यत्त्वत्र न्यायमालायामस्मिन्नधिकरणे 'समिध्यमानो अध्वरे' इत्यसावृगष्टमी । 'समिद्धो अग्न आहुत' इत्यसौ नवमी इति पाठ उपलभ्यते स लेखकप्रमादकृत इत्यभ्युपगन्तव्यम् ।

३. 'जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायते ब्रह्मचर्येणर्षिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः'इत्यर्थवादे ऋणत्रयसङ्कीर्तनादेव तदपा-

(१)द्वयोः प्रणयनं मध्यपर्वणोरप्यमोदितम् ।
(२)अर्थवादगतैर्लिङ्गैः प्रकृतित्वं तथाऽष्टमे ॥
(३)स्थानापत्तिरिरादीनां (४)चरुरोदनवाच्यपि ।
(५)उत्तराणां त्रयाधिक्य(६)मृत्विक्च ब्राह्मणो भवेत् ॥

करणरूपाणां सोमयागस्य विद्यायाः प्रजोत्पादनस्य च नित्यत्वमुक्तं षष्ठद्वितीये । (६-२-११)

१. चातुर्मास्येषु 'द्वयोः प्रणयन्तीति' श्रुतम् । तच्चाग्निप्रणयनं कयोर्द्वयोः पर्वणोरिति संशये 'ऊरू वा एतौ यज्ञस्य यद्वरुणप्रघासाः साकमेधाश्च' इत्यनन्तरोदितार्थवादे वरुणप्रघाससाकमेधाख्यमध्यमपर्वणोः स्तवनाद्विधिस्तुत्योरेकवाक्यतासम्पत्त्यर्थं तयोरेव मध्यमयोः प्रणयनमिति निर्णीतं सप्तमतृतीये । (७-३-८)

२. इष्टिपशुसोमादीनां प्रकृतिविकृतिभावस्तत्र तत्र श्रुतार्थवादबलादेव निर्णीतोऽष्टमे ।

३. "यज्ञा यज्ञा वो अग्नये गिरा गिरा च दक्षसे । प्र प्र वयममृतं जातवेदसं प्रियं मित्रं न शंसिषम्," इति मन्त्रे "ऐरं कृत्वोद्गेय" मितीरापदविधानं कुत्रेति संशये "न गिरागिरेति ब्रूयात्" इति निषेधानुवादबलाद्गिरापदकार्य एवेरापदविधानमिति निर्णयः कृतो नवमप्रथमान्त्ये । (९-१-१७)

४. "आदित्यः प्रायणीयः पयसि चरुः" इत्यत्र चरुशब्दस्स्थालीवाची ? उतौदनवाची ? इति संशये 'अदितिमोदनेने'ति वाक्यशेषविवरणात् चरुशब्द ओदनवाचीति राद्धान्तितं दशमे ।(१०-१-१०)

५. "वाग्यतस्तिस्रो दोहयित्वा विसृष्टवागनन्वारभ्य तूष्णीमुत्तरा दोहयेत्" इति विहितमुत्तरासां गवां दोहनम् । ताश्च गावः कपिञ्जलाधिकरणन्यायेन त्रित्वे पर्यवस्यन्ति ? उताधिकसंख्याका दोग्धव्या ? इति संशये–"नास्यैतां रात्रिं कुमाराश्च न पयो लभन्ते, नाग्निहोत्रं जुहोति"त्यर्थवादे साकल्यप्रतीतेर्न त्रित्वनियमः, किन्तु यावत्स्वं दोहनमिति निरधार्यैकादशप्रथमे । (११-१-७)

६. सर्वं वैदिकं कर्म त्रैवर्णिकाधिकारिकमित्युक्तम् । तत्रार्त्विज्येऽपि त्रैवर्णिकानामधिकारः ? उत ब्राह्मणानामेवेति संशये "एते

अर्थवादप्रमाणत्वे सर्वं तदुपपद्यते ॥

सर्वसाधारणं तु—पूर्वपक्षे प्रकारान्तरेणापि प्ररोचितमनुष्ठितमभ्युदयकारि, सिद्धान्ते त्वर्थवादप्ररोचितमेव (१)तदिति द्रष्टव्यम् ॥ १८ ॥

इत्यर्थवादप्रामाण्याधिकरणं प्रथमम् ॥ १ ॥

अथ द्वितीयमौदुम्बराधिकरणम् ॥

विधिर्वा स्यादपूर्वत्वाद्वादमात्रं ह्यनर्थकम् ॥१-२-१९॥

(विषयसंशयसङ्गतयः)

(२)"औदुम्बरो यूपो भवत्यूर्ग्वा उदुम्बर ऊर्क्पशव ऊर्जैवास्मा ऊर्जं पशूनाप्नोत्यूर्जोऽवरुध्यै" इत्यादिषु विधायकत्वेन वा प्रामाण्यं (३)स्तावकत्वेनैव वेति सन्देहः । पादाध्यायसङ्गती स्पष्टे । आक्षेपिकी त्वनन्तरा । ऊर्जा अन्नरूपेणौदुम्बरेण साधनेन, अस्मै यजमानाय, ऊर्जम् अन्नरूपान पशून्, आप्नोत्यध्वर्युः । अतः पशुरूपान्नसमृद्ध्यै औदुम्बरो यूपो भवतीति वाक्यार्थः ।

वै देवा अहुतादो यद्ब्राह्मणाः, यदन्वाहार्यमाहरन्ति तानेव तेन प्रीणाति" इत्यर्थवादे अन्वाहार्यादिदक्षिणायां ब्राह्मणानामेवाधिकारसङ्कीर्तनात्तदनुसारेण वैदिकेषु कर्मसु ब्राह्मणानामेवार्त्विज्येऽधिकार इत्युक्तं द्वादशान्ते (१२-४-१४) सर्वमिदमर्थवादप्रामाण्याभ्युपगम एव सिध्यतीति । १. मन्त्रवदिति. क. पु. ।

२. तै. सं. २-१-९ सोमापौष्णं त्रैतमालभेत पशुकामः" इति वाक्यविहितकाम्यपशुयागसन्निधौ श्रुतमिदं वाक्यम् । याऽजा त्रीन् वत्सान् युगपत् प्रसूते तत्रैकैकोऽपि त्रैत इत्यभिधीयते ।

३. स्तावकत्वेन वेति. क. ग. पु. ।

(पूर्वपक्षः)

तत्र श्रौतप्रथमापेक्षितानन्यलभ्यप्रधानभूतविधिपरत्वे सम्भवति न लाक्षणिकविध्यवगमोत्तरापेक्षितसम्भावितान्यलाभगुणभूतस्तुतिपरत्वमुपपत्तिमत् । नचास्य विधिवत्प्रयोजनवत्तरत्वमपि । अतो विधिरेवायम् । तत्र 'पशूनाप्नोती'ति द्वितीयया पशूनां साध्यत्वमात्रावगमेऽपि योग्यतया ईप्सितत्वस्याप्यवगमाद्भाव्यत्वसिद्धिः । यस्य तु मते (१)ईप्सितत्वमेव द्वितीयार्थस्तदा कामशब्दादिकं विनैव भाव्यत्वावगमे नैव किञ्चिद्बाधकमस्ति ।

वस्तुतस्तु "ऊर्जोऽवरुद्ध्या" इति तादर्थ्यचतुर्थ्या(२)'रन्धनाय स्थाली'(३) 'सर्वेभ्यो दर्शपूर्णमासा' वित्यादिवत्कामपदाद्यभावेऽपि भाव्यत्वावगमः स्पष्टः । ततश्च पशूनां भाव्यानां साधनापेक्षत्वात्सन्निधानाद्विनैव तृतीयया यागादिव दौदुम्बरत्वजातिस्साधनत्वेन सम्बध्यते । साध्यसाधनसम्बन्धस्य च क्रियागर्भत्वाद्दण्डेन घटो भवतीतिवच्च भवनक्रियासम्बन्धे पुरुषव्यापाराविषयत्वेन वचनवैयर्थ्यापत्तेर्लक्षणयाऽन्तर्णीतणिजर्थकल्पनया वा भवतेः पुरुषव्यापारपरत्वम् । तिपैव वा लक्षणया शक्त्यैव वा भावनाप्रतीतिः । धातुस्तु साधुत्वार्थमिसपि वक्तुं शक्यम् । तदयमर्थः- औदुम्बरत्वेन पशून् भावयतीति । साध्यसाधनसम्बन्धज्ञानादेव च प्रवृत्तिसिद्धेर्नार्थो विधिना । यदि तु विध्यभावे सन्निहिताया औदुम्बरताया एव भावनोद्देश्यत्वापत्तेर्विध्याग्रहः, तदा भवतीत्ययं पञ्चमलकारस्सन् विध्यर्थको

---

१. ईप्सितत्वमपीति. क. पु. ।

२. रन्धनं-पाकः, ।

३. अपेक्षितसर्वफलार्थं दर्शपूर्णमासयागौ कर्तव्यावित्यर्थः ।

भविष्यति ।

न च फलविधिपक्षेऽर्थवादसमभिव्याहाराभावे पञ्च-मलकारत्वनिश्चायकाभावः, विध्येकवाक्यत्वं विनाऽर्थवादत्वानिश्चयेन तस्य तदनिश्चायकत्वात् । अतः "कपिञ्जलानालभत" इतिवद्प्राप्तार्थकत्वेनैव तन्निश्चयः । अस्तु वाऽर्थवादस्यैव तन्निश्चायकत्वं, तथापि 'ऊर्ग्वा उदुम्बर' इत्यादेः 'ऊर्जैवास्मा' इत्यन्तस्य स्तावकत्वाङ्गीकारादद्दोषः । न चाश्रयाभावादविधानं; फले औदुम्बरतायाः, "सोमापौष्णं त्रैतमालभेत पशुकामः" इति प्रकृतयागस्याश्रयत्वोपपत्तेः । यद्यपि च जातेस्साक्षाद्यागसाधनत्वासम्भवः तथापि व्रीहित्वध्यादिवदेव तदाक्षिप्तकाष्ठस्य (१)प्रदेयत्वेन साधनत्वाविघातः । काम्यत्वादेव चोत्पत्तिशिष्टपशुबाधकत्वमविरुद्धम् । यूपशब्दस्तु "उपशयो यूपो भवती" तिवदर्थप्राप्तच्छेदनादिधर्मवत्तयैवानुवादः, यूपधर्मातिदेशार्थो वा ।(२) गुणफलविधौ च भावनान्तरस्वीकारादुभयविशिष्टभावनाविधानादवाक्यभेद इति द्रष्टव्यम् । अथवाऽतिदेशप्राप्ता यूपोत्पत्तिरेवाश्रयत्वेनान्वेति । न च प्रकरणेनैवाश्रयोपस्थितिः(३)कार्येति नियमस्समस्ति,अतिदेशेनापि तदुपस्थापनसम्भवात । तस्माद्विधायकत्वेनैवैवंजातीयकस्य प्रामाण्यम् । सूत्रं व्याख्यातम् ॥ १९ ॥

लोकवदिति चेत ॥१–२–२०॥

---

१. 'प्राजापत्यं घृते चरुं निर्वपेच्छतकृष्णलमायुष्कामः' इत्यत्र कृष्णलानामनदनीयानामपि यथा यागीयद्रव्यत्वं तद्वदत्रापि भवितुमर्हतीति हृदयम् ।

२. द्वितीयद्वितीये (२. २. १३.) इन्द्रियकामाधिकरणे निपुणतरमुपपादितमिदम् । ३. कर्तव्येति. पा. ।

ननु-यत्रापि लोके बुद्धिपूर्वकारिणो मात्रामपि निष्प्रयोजनां न प्रयुञ्जते, तत्रापीयं गौः क्रेतव्येत्यस्य बहुक्षीरा(१)स्त्र्यपत्येत्यादिना स्तुतिरेव दृष्टा, न तु फले विधानं, अतः कथं स्तुत्यपेक्षया विधेरर्थवत्तरत्वमिति चेत् ॥ २० ॥

न पूर्वत्वात् ॥ १-२-२१ ॥

युक्तं लोके बहुक्षीरत्वादीनां विदितपूर्वत्वात्क्रियाजन्यत्वाच्च फलविध्यसम्भवेनागत्या स्तुतिपरत्वम्, वेदे त्वविदितफलजनकत्वविधिसम्भवे विधिबलेनैव सम्भवल्लाक्षणिकस्तुतिपरत्वकल्पनं को नामाश्रयेत् ! ॥ २१ ॥

(इति पूर्वपक्षः ।)

उक्तं तु वाक्यशेषत्वम् ॥ १-२-२२ ॥ (सि)

(सिद्धान्तः)

सत्यं फलपरत्वं युक्तं, न तु तत्सम्भवः । तथाहि-यद्यपि तावत्पशूनां भाव्यत्वं गम्येत तथापि भावनायां विधिसमभिव्याहृतायामपि सन्निहितान्वितयूपपदार्थस्यैव "खादिरो यूपो भवती" तिवद्भाव्यत्वोपपत्तौ न विप्रकृष्टानां पशूनां तत्कल्पनं युक्तम्, यूपभवनाक्षिप्तायां भावनायां यूपस्यैव भाव्यत्वौचित्याच्च । एवं सत्यपि यदीन्द्रियकामादिपदवदनन्यपरं फलश्रवणं भवेद् ततः सन्निहितातिलङ्घनमप्याश्रीयेत । न तु पशूनां भाव्यत्वे प्रमाणमस्ति । (२)न हि द्वितीया भाव्यत्वाभिधायिनी,

---

१. जीवदपत्येति. क. पु. ।

२. इदं च द्वितीयाध्याये द्वितीयपादे सम्मार्गाधिकरणे ग्रन्थकृता स्पष्टीकृतम् ।

जन्यत्वमात्राभिधायित्वात् । यद्यपि चेप्सितत्वाभिधायिनी, तथापि "पशूनाप्नोती" ति वर्तमाननिर्देशाद्वर्तमानफलस्य चानुपलब्ध्या बाधाद्भविष्यदर्थकल्पनाऽऽवश्यकी । न च रात्रिसत्रवत्तदङ्गीकारेऽप्यदोषः, औदुम्बरत्वादेर्यूपार्थत्वेनैव नैराकाङ्क्ष्येण रात्रिसत्रवत्फलानपेक्षत्वादिति(१)र्णमव्यधिकरणे वक्ष्यामः। न चैवं पुनरुक्तता, अनेन फलमात्रपरत्वनिराकरणेन स्तुतिपरत्वे स्थिरीकृते तत्र रात्रिसत्रवदर्थवादस्यैव सतः फलपरत्वमाशङ्क्य निराकरिष्यते ।

यत्तु-"सर्वेभ्यो दर्शपूर्णमासा" वित्यादिवत्तादर्थ्यचतुर्थी फलप्रतिपादिकेत्युक्तम् , तदपि तादर्थ्ये सति-'देवाय पुष्पं, 'ब्राह्मणाय दुग्ध' मितिवत्प्राधान्यमात्रावगमेऽपि भाव्यत्वानवगमादसाधकमिति भवदेवेनोक्तम् । "सर्वेभ्यो दर्शपूर्णमासा"वित्यादौ त्वगत्या लक्षणया भाव्यत्वावगतिः ।

किञ्च आश्रयालाभादपि न गुणफलसम्बन्धोपपत्तिः । तथा हि-न तावत्पशुयाग आश्रयः । तत्र हि प्रदेयपरिच्छेदकत्वेन वा गुणस्य सम्बन्धः प्रकारान्तरेण वा ? (२)न तावदन्त्यः, अयोग्यत्वात् । आद्ये यूपग्रहणानर्थक्यम् । न च यूपपदं धर्मातिदेशकम् । तथा सति यूपधर्मवानुदुम्बरप्रकृतिक इत्यर्थावगमेऽपि विशेष्याश्रवणेन साकाङ्क्षत्वप्रसङ्गात् । अध्याहृतविशेष्यस्यैव गुणद्वयविशिष्टस्य विधौ (३)गौरवाच्च । न च प्रधानभूतयागस्याश्रयत्वासम्भवे '(४)आनर्थक्यतदङ्ग' न्यायेन यूपेऽवतारः, आश्रयत्वस्य 'आनर्थक्यतदङ्ग'न्यायाविषयत्वेन (५)रेवत्यधिकरणे

१. ४-३-१. २. नान्त्य इति. क. पु. ।
३. गौरवप्रसङ्गाच्चेति क. पु. ।
४. आनर्थक्यात्तदङ्गेषु० इति न्यायः तृतीयप्रथमे नवमाधिकरणे।
५. २-२-१४

स्थापयिष्यमाणत्वात् । सत्यपि विषयत्वे यूपमात्रावतारे प्रमाणाभावाच्च । नापि यूपोत्पत्तिः पशुनियोजनं वाऽऽश्रयः, तयोरातिदेशिकत्वेनाप्रकृतत्वात् । अतिदेशस्य सर्वाङ्गसाधारणस्यैकत्वेन तयोर्विशिष्योपस्थित्यभावाच्च । साधारणोपस्थित्या चाश्रयत्वाङ्गीकारे जुह्वादीनामप्याश्रयत्वापत्तिः । इष्टापत्तौ च यूपपदवैयर्थ्यतादवस्थ्यम् । अनेनैव च वाक्येन यूपस्याश्रयत्व उच्यमाने वाक्यभेदः । तेनाश्रयाभावादपि न गुणफलसम्बन्धः । तेनातिदेशप्राप्तयूपोद्देशेनैवौदुम्बरत्वविधिः । तत्स्तुतिश्च सर्वोऽयमर्थवादः । अत उक्तरीत्या वाक्यशेषत्वमेव युक्तमिति सूत्रार्थः ॥ स्तुत्यालम्बनं च पूर्णाहुतिवत्प्रधानफलानुवादाद्द्रष्टव्यम् ॥ २२ ॥

विधिश्चानर्थकः क्वचित्तस्मात्स्तुतिः प्रतीयेत तत्सामान्यादितरेषु तथात्वम् ॥ १-२-२३ ॥

किञ्च—तुल्यन्यायत्वात्सर्व एव फलविधिसरूपवद्द्रव्यदेवतागुणक्रियाविधिसरूपास्तत्रया विधायकत्वेनाऽऽशङ्कनीयाः, यथा—(१)"यजमानः प्रस्तरः" इत्यादयो द्रव्यस्य, "आग्नेयो वै ब्राह्मणः" इत्यादयो देवतायाः, (२)"यो विदग्धस्स नैर्ऋतः, योऽशृतस्स रौद्रः" इत्यादयो गुणस्य,(३)"निवीतं मनुष्याणाम्" (४)"इति ह स्माह बर्कुर्वार्ष्णिर्माषान्मे पचत" (५)"वायुर्वै क्षेपिष्ठा देवता" (६)"अप्सुयोनिर्वा अश्वोऽप्सुजो वेतसः" इत्यादयः क्रियायाः । तत्र यद्यपि निवीतादिक्रियाविधिषु शक्यार्थविषयत्वं,तथापि वायुवेतसादीनां क्षेपिष्ठत्वाब्जन्यत्वस्य स्वभावादेव सिद्धेरश्वादौ च तस्य प्रयत्नेनाप्यनिष्पत्तेरनर्थको विधिः । तस्मात्स्तुतिः प्र-

---

१. तै. सं. २. ६.५. २. तै सं. २. ६.३. ३. २. ५.११.
४. शत. ब्रा. १. १.२. ५. तै. सं. २. १.१. ६. तै ब्रा. ३.८.१९

तीयेत । स्तुतिप्रकारश्च वायूदाहरणे पूर्वमेव प्रदर्शितः । वेतसाश्वयोस्त्वेवम् "अप्सु योनिर्वा अश्वोऽप्सुजो वेतसः स्व एवैनं योनौ प्रतिष्ठापयति" इत्ययं(१) "वैतसे कटेऽश्वं चिनोति" इत्यस्यविधेश्शेषः । तत्र वेतसे ऽब्जन्यत्वस्य प्रत्यक्षत्वादश्वस्यापि पुराणेष्वब्जन्यत्वप्रसिद्धेः, कार्यकारणयोरभेदोपचारेण वेतसप्रकृतिभूतास्वप्सु चयनादश्वस्य स्वयोनौ प्रतिष्ठापनं कृतं भवतीति चयनस्तुतिः ।

यद्यपि च—स्वयोनिप्रतिष्ठापनमात्रेण न काचित्स्तुतिबुद्धिः, तथापि(२) "आपो वै शान्ताः" इत्यर्थवादान्तरेऽपां शान्तत्वेन यजमानकष्टशमयितृत्वावगमादेवंविधप्राशस्त्यवतीष्वप्सु प्रतिष्ठापनेन चयनस्य स्तुतिः प्रत्येतव्या । अतश्च तत्सामान्यादितरेष्वपि सर्वविधिप्ररूपेषु तथात्वं द्रष्टव्यम् । नचैवं (३)'तत्सिद्धि' सूत्रादावपि विध्यर्थवादविचारस्य करिष्यमाणत्वात्पौनरुक्त्यम्, तत्सिद्धिसूत्रस्य तावद्गुणवादनिमित्तमात्रकथनपरत्वेनात्रत्यस्यैव विध्यर्थवादविचारस्य तदर्थस्मारणात् । (४)निवीताद्यधिकरणानि तु कृत्वाचिन्तात्वेन व्याख्येयानि । अर्थवादत्वकथनं तु तत्र कृत्वाचिन्तोद्घाटनम् । एवं षाष्ठमपि (५)माषपाकाधिकरणं व्याख्येयम् । सूत्रं व्याख्यातम् ॥ २३ ॥

प्रकरणे च सम्भव(६)न्नपकर्षः कल्प्येत विध्यानर्थक्यं हि तं प्रति ॥ १-२-२४ ॥

किञ्च—'यो विदग्ध" इत्यादौ यदि तावद्यच्छब्दानुरोधेन

---

१. तै ब्रा. ३.८.१९. २. तै. सं. ५. ४.४. ३. पू. मी. १.४.२३, ४. पू. मी. ३. ४. १. ५. पू. मी. ६. ६. ११.

६. यद्यपि अपकर्षो न कल्प्येत इ त्येव सर्वत्र पाठस्समुपलभ्यते, तथापि हस्तलिखितकौस्तुभपुस्तकयोर्नञ्रहितस्यैव पाठस्यदर्शनात् तथैव ग्रन्थकृता व्याख्यातत्वाच्च स एव पाठो निवेशितो मया ।

दर्शपूर्णमासप्रकरणस्थविदग्धत्वे निमित्ते निर्ऋत्यादिदेवतान्तरविधिः, तदा स्तावकत्वेन गतिसम्भवे नित्यस्याप्युत्पत्तिशिष्टदेवतान्तरस्य बाधाख्योऽपकर्षः कल्प्येत । अथैतद्दोषभयाद्व्यवहितकल्पनयापि 'यो नैर्ऋत' इति तद्धितान्तपदलक्षितनिर्ऋतिदैवत्ययागीयद्रव्योद्देशेन विदग्धत्वविधानं, तदा(१) "पूषा प्रपिष्टभाग" इति वत्प्रकरणादपकर्षः कल्प्यः । दर्शपूर्णमासप्रकरणे निर्ऋतिदेवताभावेन दर्शपूर्णमासकर्म प्रति विध्यानर्थक्यात् । न च प्रकरणे एव कर्मान्तरविधिश्शङ्क्यः, यत्तच्छब्दान्वयानुपपत्तेः । "अविदहता श्रपयितव्य" इति विध्येकवाक्यत्वसम्भवे वाक्यभेदाङ्गीकारायोगाच्च । तथाचोत्तरसूत्रे वक्ष्यति—"विधौ च वाक्यभेदस्स्यात्" इति । तस्मात्स्तावकत्वमेव युक्तम् ॥
सूत्रं व्याख्यातम् ॥ २४ ॥

विधौ च वाक्यभेदस्स्यात् ॥ १-२-२५ ॥

इदं सूत्रम् स्तुतिपरस्यापि "ऊर्जोऽवरुद्ध्या" इत्यस्य फलपरत्वे शङ्क्यमाने—यदि तावत् श्रूयमाणस्यैवोभयपरत्वम् , तदा तात्पर्यानेकत्वनिमित्तो वाक्यभेदः । रात्रिसत्रन्यायेन श्रुतस्य शब्दस्य स्तुतिमात्रपरत्वेऽपि विहितस्यौदुम्बरत्वस्य फलापेक्षायां कल्पितेन शब्देन फलविधौ शङ्क्यमाने तु गौरवलक्षणो वाक्यभेदः । यद्यपि चेयं शङ्का पर्णमय्यधिकरणे निराकरिष्यते, तथाप्यत्रापि प्रसङ्गान्निराकृतेति मूले व्याख्यातम् । वस्तुतस्तु—अनन्तरसूत्रानुगुण्याद्विदग्धादिवाक्येष्वेव कर्मान्तरशङ्कानिराकरणार्थं वेदितव्यम् । निराकरणप्रकारश्च पूर्वमेव दर्शितः ॥ २८ ॥

इति द्वितीयमौदुम्बराधिकरणम् ॥ २ ॥

(विधिवन्निगदाधिकरणम्)

---

१. तै. सं २. ६. ८.

अथ तृतीयं हेतुवन्निगदाधिकरणम् ॥

हेतुर्वा स्यादर्थवत्त्वोपपत्तिभ्याम् ॥ १-२-२६ ॥ (पू)

(विषयसंशयसङ्गतयः)

चातुर्मास्येषु–(१)"शूर्पेण जुहोति, तेन ह्यन्नं क्रियते" इति श्रुतम् । तत्र 'तेन ह्यन्नं क्रियत' इत्यस्य हेतुविधायित्वेन प्रामाण्यं स्तावकत्वेन वेति सन्देहः । पादाध्यायसङ्गती(२) स्पष्टे । अनन्तरा तु पूर्वत्र कामपदाद्यभावात्फलपरत्वं निराकृतम्, इह तु हेतुप्रतिपादक'हि'शब्दश्रवणाद्धेतुविधित्वसम्भव इति पूर्वपक्षोत्थानात्पूर्वाधिकरणसिद्धान्तहेतुप्रत्युदाहरणरूपा । अत एव न पौनरुक्त्यमपि ।

(पूर्वपक्षः)

तत्र हिशब्दश्रुत्याऽन्नकरणत्वस्य हेतुत्वमुच्यते । हेतोश्च साध्यापेक्षायां सन्निधानाल्लाघवाच्च होमसाधनत्वं साध्यत्वेन सम्बद्ध्यते ।

यद्यपि च पूर्वं व्याप्त्यवगममन्तरेण लोके प्रायशो न हेतुत्वावगमः, तथाप्यनवगतव्याप्तेरपि पुंसो धूमो वह्नेर्हेतुरित्याप्तोपदेशादेव व्याप्त्यनुमानवद्वेदावगतहेतुत्वान्यथानुपपत्त्या व्याप्तिवचनं कल्प्यते—यद्यदन्नकरणं तेन तेन होतव्यमिति । अस्ति च दर्वीपिठरशूर्पादीनामन्नकरणत्वम्; पाकादिरूपव्यापारवत्त्वात्, विप्रकृष्टलाङ्गलाद्यपेक्षया साधकतमत्वाच्च ।

अत्र च तच्छब्देन शूर्पपरामर्शेऽपि न तस्य हेतौ प्रवेशः, हिश-

१. चातुर्मास्यान्तर्गतवरुणप्रघासाख्ये द्वितीये पर्वण्याम्नातमिदम्।
२. सङ्गतिस्स्पष्टैवेति० क. ख. पु. ।

ब्दोपात्तहेतुत्वविधावुद्देश्यस्य तृतीयोपात्तस्य करणत्वस्य प्रातिपदिकोपात्तेन शूर्पेण विशेष्टुमशक्यत्वात्। शूर्पस्य पक्षत्वेन तद्वृत्तित्वस्य हेतुतावच्छेदकत्वानुपपत्तेश्च। अत्र च 'शूर्पेण जुहोति, तेन ह्यन्नं क्रियते' इत्युभयत्रापि वर्तमाननिर्देशाद्धोमसमानकालीनान्नक्रियाप्रतीतेस्तादृश्याश्चासम्भवेन तन्निरूपितकरणत्वस्य होमसाधनत्वं प्रति हेतुत्वासम्भवात् 'क्रियत' इत्यत्र कृञा स्वार्थविषयिणी शक्तिर्लक्ष्यते—तेन कर्तुं शक्यत इति। अन्नक्रियाजनकशक्तेश्च सर्वदा वर्तमानत्वान्न लटोऽनुपपत्तिः।

वस्तुतस्तु शक्तिं प्रति तृतीयोपात्तस्य करणत्वस्यानन्वयापत्तेश्शक्तिव्यतिरिक्तकरणत्वाभावाच्च शक्तिलक्षकत्वानुपपत्तेर्लट एव भूतत्वे भावित्वे वा लक्षणा। आवश्यकी चेयं लक्षणा स्तुत्यालम्बनार्थं सिद्धान्तिनोऽपि। तेन तादृशान्नक्रियाकरणत्वस्य हेतुत्वोपपत्तिः। अत्र च होमस्य (१)"करम्भपात्राणि जुहोति" इत्युत्पत्तिवाक्येनैव प्राप्तत्वात्तदनुवादेनान्नकरणत्वहेतुकमन्नकरणमात्रस्य दर्वीपिठरादेस्साधनत्वं श्रुतानुमितैकदेशनिष्पन्नवाक्येन विधीयते। शूर्पपदं चा(२)वयुत्यानुवादोऽन्नकरणमात्रोपलक्षणं वा। दर्वीपिठरादीनामपि होमसाधनत्वसिद्धिश्च व्याप्तिकल्पकस्य हेतोः प्रयोजनमिति नानर्थक्यम्। नचैवं प्राशस्त्यसमर्पकाभावः, विधेरेवाप्राप्तिबललब्धप्राशस्त्यलाभोपपत्तेः।

---

१. का. श्रौ. सू. ५. ५. १०. दक्षिणाग्नौ यवानीषद्भर्जयित्वा तान् पिष्ट्वा (चूर्णीकृत्य) जलेन संयुत्य तेन पिष्टेन यजमानस्य यावत्यः प्रजाः स्युः तत एकाधिकानि पात्राणि क्रियन्ते। तानि करम्भपात्राणि। तानि च नवीने शूर्पे निक्षिप्य तत् शूर्पं पत्नी स्वशिरसि निक्षिप्य यजमानान्वारब्धा दक्षिणेऽग्नौ जुहुयात्। एष सम्प्रदायः॥

२. अवयुत्य समुदायात् पृथक्कृत्यानुवादः।

हेतुसमर्पकस्यैव वा(१)रात्रिसत्रवदुभयपरत्वकल्पनया प्राशस्त्य-परत्वोपपत्तिः । तस्माद्धेतुविधिरेवायम् "न ह्यत्रानूयाजान्यक्ष्यन् भवती" तिवत् ॥ सूत्रं व्याख्यातम् ॥ २६ ॥

(इति पूर्वः पक्षः)

स्तुतिस्तु शब्दपूर्वत्वादचोदना च तस्य ॥१-२-२७॥(सि)

(सिद्धान्तः)

नैवम्; प्रथमोपस्थितविध्युद्देशवर्त्यनन्यप्रयोजनशूर्पपदवैय-र्थ्यप्रसङ्गात् । अतश्शूर्पं तावदवश्यं विधेयम् । तेन प्रत्यक्ष-श्रुतेन शूर्पेणाऽऽनुमानिकैर्दर्व्यादिभिर्न विकल्पः, न वा तस्य तैर्बाधः । समुच्चयोऽपि शूर्पस्य नैरपेक्ष्यबाधादयुक्तः । तथा हि —"(२)समर्थः पदविधिः" इति सूत्रेण तात्रत्पदमात्रस-म्बन्धिविधौ सामर्थ्यं विधीयत इति निर्विवादम् । (३)न चै-तस्य समासप्रकरणस्थत्वात्पदमात्रे न सामर्थ्यविधायकत्वम्, एतस्य परिभाषारूपत्वेन प्रकरणेनानियमात् । अन्यथा ताद्धि-तविधावप्यस्य प्रवृत्त्यनापत्तेः । न च तत्र "(४)समर्थानां प्रथ-माद्वा" इति सूत्रेण सामर्थ्यापेक्षत्वविधिः, अस्य सूत्रस्य 'सम-र्थानां पदाना' मित्यनूद्य 'प्रथमाद्वा प्रत्ययोत्पत्ति' रित्येतद्वि-धिपरत्वात् ।

वस्तुतस्तु नास्य समासप्रकरणस्थत्वम् । अतस्समास-वत्पदस्य सतो विधिरित्यर्थासम्भवेऽपि प्रातिपदिकादनुशि-ष्टस्यापि तद्धितस्य पदसम्पादकत्वात्, उभयसाधारण्येन पदस-

---

१. रात्रिसत्रे स्तावकस्यार्थवादस्य फलपरत्वमपि यथा कल्प्यते तद्वदुभयपरत्वमिति भावः । २. पा. सू. २. १. १. ।

३. न च तस्येति ख. पु. । ४. पा. सू. ४. १. ८२ ।

म्बन्धिविधिमात्रम् । पदविधिशब्दार्थो महाभाष्ये प्रसिद्धः । एवं च सुप्तिङ्विधेरपि धातुप्रातिपदिकादनुशिष्टत्वेन पदसम्बन्धित्वा त्सामर्थ्यापेक्षत्वमविरुद्धम् । अतश्शूर्पेणेत्यत्रापि सामर्थ्यापेक्षत्वा-दन्यापेक्षत्वे च सामर्थ्यभङ्गापत्तेर्न समुच्चयः ।

ननु–"समर्थः पदविधिः" इत्यत्र महाभाष्यकारेण द्विविधं सामर्थ्यमुक्तम्—व्यपेक्षालक्षणमेकार्थीभावलक्षणं च । तत्र यदि तावदन्योन्यापेक्षत्वरूपं व्यपेक्षालक्षणम्, यथा 'राजपुरुष' इत्यत्र राजपदस्योत्थिताकाङ्क्षत्वं पुरुषपदस्य चोत्थाप्याकाङ्क्षत्वम्, तथा सति शूर्पेणेत्यत्र द्रव्यान्तरसाकाङ्क्षत्वेऽपि प्रकृतिप्रत्यययोः परस्प-रसापेक्षत्वान्न विरोधः । न चैवमृद्धपदसाकाङ्क्षत्वेऽपि राजपुरुष इति समासापत्तिः, "सविशेषणानां वृत्तिर्नेष्यते" इति वार्तिकेन तन्निषेधात् ।

अथ तु सूत्रवार्तिकयोरेकवाक्यतया पदान्तरसापेक्षत्वे-ऽप्यसामर्थ्यं स्यात्, तथापि शाब्दान्वयसापेक्षत्व एव तत्, नत्वर्थान्तराकाङ्क्षत्वेऽपि । व्रीह्यादीनामवघाताद्यपेक्षत्वेऽपि साम-र्थ्याविघातात् । अथैकार्थीभावलक्षणं तत्; तथापि समास-वच्छूर्पकरणत्वयोर्विशेषणविशेष्यभावमात्रेणैकार्थ्योपपत्तेर्न द्रव्या-न्तरसापेक्षत्वेऽपि सामर्थ्यभङ्ग इति चेन्न; विशेषणत्वस्यान्य-योगव्यावृत्तिं विनाऽसम्भवेन द्रव्यान्तरसापेक्षत्वे विशेषणत्व-स्यैवानुपपत्तावेकार्थीभावलक्षणसामर्थ्यानुपपत्तेः ।

यद्यपि चायोगव्यावृत्तिरूपनियमफलकत्वेनापि विशेषणत्वो पपत्तिः, तथापि शूर्पस्याविशेषाद्धोमीयसकलद्रव्याधारत्वेन वि-धानात्तत्र चायोगव्यावर्तनरूपस्य नियमस्य द्रव्यान्तरव्यावृत्ति मन्तरेणासिद्धेर्न समुच्चयोपपत्तिः ।

एवञ्च यद्यपि "समर्थः पदविधि" रित्यनेन पदमात्रविधौ

सामर्थ्यविधिर्न स्यात्; तथापि द्रव्यविधेर्नियमविधित्वात्तस्योक्तविधया द्रव्यान्तरव्यावृत्तिमन्तरेण सिद्ध्यसिद्धेः तात्पर्यानवगतेस्समुच्चये च तदसिद्धेर्न पुरुषेच्छामात्रेण समुच्चयोपपत्तिः । आवृत्त्यापादनेन तु समुच्चयपक्षो गुणानुरोधेन प्रधानावृत्त्ययोगादयुक्तः । विस्तरेण चैतदुपपादितम्—

(१)"समासस्सति सामर्थ्ये तच्चापीष्टं विशेषणे ।
विशेषणं व्यवच्छेत्तृ विशेष्यव्यापि चोच्यते ॥"

इत्यादिना रथन्तरचरणे वार्त्तिककृता । तस्मान्न समुच्चयोऽपि ।

अतश्च प्रत्यक्षश्रुतेन शूर्पेणैव होमस्य निराकाङ्क्षत्वात् नानुमानिकानां दर्वीपिठरादीनामन्वयः ।

न च शूर्पासम्भवेऽनुकल्पत्वेनान्वयश्शंक्यः, हिशब्दश्रुतेरपेक्षितस्तुतिमात्रपरत्वसम्भवेऽनपेक्षितहेतुपरत्वकल्पने प्रामाण्याभावेन दर्वीपिठराद्यन्वयविधायिव्याप्तिकल्पने गौरवात् ।

न च स्तुतिपरत्वे लक्षणापत्तिः, अपेक्षानुरोधेन तस्या अप्याश्रयणीयत्वात् ।

वस्तुतस्तु हिशब्दो हेतुत्वमेव वदन् विधिं प्रति हेतोरनपेक्षितत्वात् आनर्थक्यतदङ्गन्यायेन स्तुतिं प्रत्याश्रीयते—अन्नकरणत्वात्प्रशस्त इति । अतो विधिशब्दापेक्षापूर्वकत्वात् स्तुतिरेव न्याय्या, यतोऽन्नकरणत्वस्य हेतुत्वेऽपि दर्वीपिठरादेः साधकतमत्वाभावेनाकरणत्वात्, साधकतमस्य च पाकादेः होमसाधनत्वायोगात्, अचोदनेत्येव सूत्रार्थः ॥ २७ ॥

व्यर्थे स्तुतिरन्याय्येति चेत् ॥ १-२-२८ ॥

नन्वेवं शूर्पेऽपि साधकतमत्वाभावात् स्तुत्यालम्बनरूपार्थरहिते स्तुत्यनुपपत्तिः ॥ २८ ॥

---

१. तं. वा. पृ. ५७९ ।

अर्थस्तु विधिशेषत्वाद्यथा लोके ॥ १-२-२९ ॥

अस्मत्पक्षे त्वेतस्य विधिशेषत्वेनानुवादकत्वात्, अनुवादस्य च यथाप्राप्ति वर्णनीयत्वात्, यादृशं लोके शूर्पस्य विप्रकृष्टलाङ्गलाद्यपेक्षयाऽन्तरङ्गत्वादन्नं प्रति साधकतमत्वं दृश्यते, तादृशस्यैव स्तुत्यालम्बनार्थमनुवादो नानुपपन्नः। एवमेव वर्तमाननिर्देशोऽपि अनुवादत्वादुक्तरीत्या करोतेश्शक्तिलक्षकत्वेन लटो वा भूतभविष्यत्काललक्षकत्वेन व्याख्येयः। अनुवादत्वादेव च लक्षणापि न दोषः। प्रत्युत स्तुत्युपपादकत्वाद्गुण एव। न हि भूते भाविनि वा तादृशी प्रीतिर्यादृशी वर्तमाने। न वा वर्तमानशक्तिके तादृशी यादृशी फलोपहिते। अतो वर्तमानशक्तिकं हेतुं कृतं करिष्यमाणं वा स्तोतुमस्मत्पक्षे 'क्रियत' इति निर्देशोपपत्तिः। हेतुविधिपक्षे तु प्रमाणान्तरसिद्धार्थानुवादकत्वाभावाद्यथाश्रुतादीषदप्यन्यथात्वकल्पनं दोष एव।

अत एव यत्र हेतुविधिपक्षेऽपि न लक्षणा। यथा -(१)आतिथ्यायां "चतुर्गृहीतान्याज्यानि भवन्ति, न ह्यत्रानूयाजान्यक्ष्यन्भवती" त्यत्र। तत्र हेतुरेवानूयाजाभावः चतुर्गृहीतत्रित्वविधिफलीभूताष्टगृहीतगतग्रहणचतुष्कनिवृत्तौ। अतश्च तत्र हेतुबलेन व्याप्तिकल्पनायामातिथ्याव्यतिरिक्तायामपि खण्डेष्टावनूयाजाभावे सति चतुर्गृहीतत्रित्वप्राप्तेरष्टगृहीतानिवृत्तिसिद्धिः। प्रकृतौ च "अष्टावुपभृति गृह्णाति" इत्यत्र चतुष्कद्वयलक्षणाद्योतनार्थत्वादेतस्य प्रयाजार्थं जुह्वां समानयने नियोगतोऽर्द्धमेव समानेतव्यमिति लभ्यते। अन्यथा हि प्रयाजानूयाजयोर्मिलित्वा पञ्चसंख्याकत्वात्

---

१. सोमयागे दीक्षानन्तरदिने सोमक्रयणानन्तरं क्रियमाण इष्टिविशेष आतिथ्या।

(१)'सम स्यादश्रुतत्वा' दितिन्यायेन प्रयाजद्वयार्थं किञ्चिदधिक-स्रुवत्रयस्यैवानयनं प्रसज्येत । यथा च न प्रकारान्तरेण चतुष्कद्वयसिद्धिः, तथा चतुर्थे(२) उपपादयिष्यते । अतश्च तत्र लक्षणाभावाद्धेतुविधित्वमेव, प्रकृते तु लक्षणाप्रसङ्गात् स्तुति-परत्वाङ्गीकारः ॥ २९ ॥

(३)यदि च हेतुरवतिष्ठेत निर्देशात् ॥ १-२-३० ॥

यद्यपि चायं हेतुविधिस्स्यात् , तथापि शूर्पगतस्यैवान्नकर-णत्वस्य हेतुत्वमवतिष्ठेत, न दर्वीपिठरादिगतस्यापि, शूर्पस्यैव होमसाधनत्वनिर्देशात् । न च शूर्पगतहोमसाधनत्वे साध्ये ऽन्य-गतान्नकरणत्वस्य(४) हेतुता सम्भवति, सामानाधिकरण्याभा-वात् । सन्निहितपरामर्शिसर्वनामोत्तरतृतीयाश्रवणेन पदश्रु-त्या तद्गतस्यैवान्नकरणत्वस्याभिधानाच्च । न चान्नकरणत्वस्य हेतुत्वं प्रत्युद्देश्यत्वात्तद्विशेषणाविवक्षा, अन्नकरणत्वस्य स्वरू-पतो लोकावगतस्यापि सोमादिवद्विधेयत्वेनानुद्देश्यत्वात् ।

यत्तु धूमादिवत्पक्षवृत्तित्वेन हेतोरविशेषणमित्युक्तम् । तन्न, धूमादौ विशेषधर्मेण व्याप्त्यनवगमाद्युक्ता धूमत्वादिना सामा-न्येन हेतुता । वेदे तु प्रमाणान्तरेण व्याप्त्यनवगमात् , विशेष-तश्श्रुतहेत्वन्यथानुपपत्तेर्विशेषव्याप्तिकल्पनयाऽप्युपपत्तौ न श्रुतप-रित्यागे प्रमाणमस्ति । दृष्टं च लोकेऽपि विशेषतस्तृणधूमदर्श-नात् तृणाग्नेरनुमानम् । अतो यद्यदन्नकरणं शूर्पं तेन तेन होत-

---

१. जै. सू. १०-३-५३.

२. चतुर्थप्रथमान्त्याधिकरणे 'तदष्टसंख्य'मित्यत्र ।

३. इतस्सूत्रत्रयमेकसूत्रतया परिगणितं भाष्यादौ ।

४. त्वस्यापि. क. पु. ।

व्यमिति व्याप्तिकल्पनादसमर्थशूर्पव्यावृत्तिः परं भवेत्, न तु तद्व्यादिव्याप्तिः। इदं च वस्तुनो लक्षणाप्रसंगेन स्तुतिपरत्वस्यै-वोक्तत्वादभ्युपेत्यवादेनैवोक्तम्। तत्प्रयोजनं च नानूयाजाभा-वमात्रस्य हेतुत्वम्, किन्तु बहुवचनश्रवणात् बह्वनूयाजाभाव-स्यानूयाजसामान्याभावरूपस्य। अतोऽवभृथे बर्हिरनूयाजमात्रा-भावेऽपि न व्यभिचारः ॥ ३० ॥

सामान्यादिति चेत् ॥ १-२-३१ ॥

ननु—अविशेषप्रवृत्ततृतीयारूपप्रत्ययश्रुत्यनुरोधेन पदश्रुति-बाधादञ्जकरणसामान्यस्यैव हेतुत्वं स्यादिति चेत् ?-॥ ३१ ॥

अव्यवस्था विधीनां स्यात् ॥ १-२-३२ ॥

प्रत्ययश्रुत्यंगीकारे हि यद्यद्गृहीतं तस्य तस्य क्वाचिदञ्जनिमि-त्ताऽस्त्येवेत्यनवस्थितत्वाद्यत्किञ्चित् द्रव्यं होमे प्रसज्येत। तादृश-स्य च होमाक्षेपादेव प्राप्तत्वादनर्थकोऽञ्जकरणशब्दः। अतश्च प्रत्ययश्रुतेरानर्थक्यप्रतिहतत्वाद्दुर्बलश्रुत्यनुरोधो न दोषाय॥ ३२॥

इति तृतीयं हेतुवन्निगदाधिकरणम् (हेत्वधिकरणम्)

अथ चतुर्थं मन्त्राधिकरणम् ॥

तदर्थशास्त्रात् ॥ १-२-३३ ॥ (पू)

(विषयसंशयसङ्गतयः)

'मन्त्रानर्थक्य'मित्यन्तस्य एकसूत्रत्वेऽपि व्याख्यासौकर्यार्थं खण्डशः प्रत्येकं पञ्चम्यन्तसूत्रावयवोपन्यासः। इह मन्त्रानुदा-

द्दस्य किं तेषां धर्मे प्रामाण्यमुत नेति-विचारः । अत्र पादाध्यायसङ्गती पूर्ववत् ॥

(पूर्वपक्षः)

तत्र यद्यप्यर्थवादवदेवाऽध्ययनविधिनाऽध्ययनसंस्कार्यता मन्त्राणामवगता, तथापि मन्त्राणामुपयोगापेक्षायां न तावत् विधिवत्स्वतो विधायकत्वेनोपयोगसम्भवः, विधिविहितार्थानुवादकत्वात्; यच्छब्दादिना विधिशक्तिप्रतिबन्धाच्च ।

नापि स्तावकत्वेन, अर्थवादवत्प्रदेशान्तरविहितस्तुत्यसम्भवात्। तथा हि—मन्त्राणां स्तावकत्वमर्थवादवत्पदैकवाक्यतया वा ? वाक्यैकवाक्यतया वा ? नाद्यः ; प्रदेशान्तरस्थत्वात् । नान्त्यः; पदार्थविधया लक्ष्यस्तुतिमात्रप्रतिपादनेऽपि अर्थवादवदेव स्वार्थबोधे समाम्नयभावात् । अतो न स्तावकत्वम् । विस्तरेण चैतत्(१)द्वितीये द्वयमपि निराकरिष्यते । अत एवार्थवादप्रामाण्यहेतुप्रत्युदाहरणरूपेण पूर्वपक्षोत्थानादर्थवादविचारसङ्गतिः । अनन्तराधिकरणद्वयस्य त्वाक्षेपसमाधानार्थत्वेनार्थवादाधिकरणशेषत्वादव्यवधायकत्वम् । प्रकरणान्तरत्वेन चानन्तरसङ्गत्यभावेऽपि न दोषः ।

नापि स्मारकत्वेन; तथाङ्गीकारेऽप्यनधिगतार्थगन्तृत्वरूपस्य प्रमाकरणत्वरूपस्य वा प्रामाण्यस्य तावदयोगस्तदवस्थ एव । किञ्च इदं स्मरणमपि यत्किञ्चित्स्वार्थमात्रविषयकम् ? कर्मसमवेतानुष्ठेयार्थविषयकं वा ? नाद्यः, अनुपयोगात् ; साम्नां मन्त्रत्वस्य(२)द्वितीये वक्ष्यमाणत्वात्तेषां चार्थाभावेनाव्यापकत्वाच्च । नान्त्यः, अनुष्ठेयार्थस्मरणस्य ध्यानादिनाप्युपपत्तौ

---

१. पू. मी. २. १. ७. २. पू. मी. २. १. १२.

मन्त्रवैयर्थ्यात्; वाचकमन्त्रशब्दस्मरणस्यार्थस्मरणाधीनत्वेन वैपरीत्याच्च।

किञ्च—प्रोत्साहनानुमन्त्रणादिमन्त्राणां (१)"अगन्म सुव" रित्यादीनां कर्मसमवेतार्थाभिधायित्वेऽप्यननुष्ठेयार्थकत्वान्न स्मरणोपयोग इत्यव्यापकत्वं तदवस्थमेव। जपादिमन्त्राणां तु कर्मासमवेतार्थाभिधायित्वमपि प्रायशो लक्ष्यते। एवं यत्रापि करणमन्त्रे समवेतार्थाभिधायित्वं तत्रापि द्वित्राणामेव निर्वापादिपदानां तत्, न तु (२)'देवस्य त्वा' दिपदानाम्। साममन्त्राणां तु गीत्यात्मकत्वेनाऽवाचकत्वान्नार्थाभिधायित्वमपि। अतः स्मारकत्वेनाप्युपयोगासंभवात्, अध्ययनसंस्कृतानां चोपयोगापेक्षायां प्रकरणपठितानामनारभ्याधीतानां च यथासम्भवं श्रुतिवाक्याधिकाराख्यप्रकरणक्रमसमाख्यादिभिः प्रधानाङ्गत्वेनावगतानां प्रधानविधिना मन्त्रस्वरूपमेवाङ्गीक्रियते, न तु ब्राह्मणवाक्यवदर्थोऽपि, अनुपयोगात्। मन्त्रस्वरूपस्य च स्वतोऽक्रियारूपत्वाद्यद्यपि नेतिकर्तव्यतात्वेनान्वयो योग्यः, नापि स्वरूपेण प्रधानोपकारकत्वसम्भवः, तथापि प्रमाणान्तरावगतमन्त्रस्वरूपाङ्गत्वनिर्वाहायोच्चारणक्रियाद्वारेण व्रीह्यादिवत्कारकत्वेनान्वयोऽङ्गीक्रियते। प्रायशश्च वेदे मन्त्रणा 'मित्याहो' पनिबद्धत्वादुच्चारणक्रिया श्रुतैव। यत्रापि (३)"बर्हिर्देवसदनं दामी" त्यादौ सा न श्रुता, तत्रापि परिशेषात्सैव कल्प्या। न हि (४)प्रत्यायनस्य पुरुषकृत्यसाध्यस्य व्यापारत्वं (५) घटते। अत उच्चारणमेव व्यापारः। तस्य चोक्तविधया दृष्टप्रयोजनासम्भवाददृष्टार्थत्वम्।

---

१. तै. सं. १. ६. ६. २. तै. सं. ४. १. १. ३. मै. सं. १. १. २.
४. अर्थप्रत्यायनस्येति ख. पु. ५. सम्भवति इति ग. पु.

नचैवमर्थपरत्वाभावे स्वाध्यायाध्ययनविधेरदृष्टार्थतापत्तिः, हुंफडाद्यध्ययनवन्मन्त्राध्ययनस्यापि कर्मकालीनोच्चारणप्रयोगप्राशुभावसिद्ध्यर्थत्वेन दृष्टार्थत्वात् । अत उच्चारणाक्रियाद्वारेण मन्त्राणां प्रधानभावनाग्रहणम् ।

न च मन्त्राणामशाब्दत्वाच्छाब्दक्रतुभावनानन्वयः, क्रमादिकल्पितया अनेन मन्त्रेणास्य प्रधानस्योपकुर्यादित्येवंविधया श्रुत्या मन्त्राणामपि शाब्दत्वात् । एवंचार्थप्रत्यायनार्थत्वाभावाल्लिङ्गेन तत्तद्वान्तरकार्ये बर्हिर्लवनादौ विनियोगायोगाद्दर्शपूर्णमासादिप्रकरणपठितानां सर्वेषां मन्त्राणां यत्रक्वचित्प्रयोगे प्राप्ते केषाञ्चिन्मन्त्राणां क्रियाविशेषानुष्ठानकालीनोच्चारणविधायिशास्त्रस्याप्युपपत्तिः, अन्यथा हि लिङ्गादेवानुष्ठेयक्रियाङ्गत्वसिद्धेः पुनस्तदङ्गत्वप्रतिपादकस्य शास्त्रस्य वैयर्थ्यमेव स्यात् । यथा (१)"अभ्रिरसि नारिरसी" त्यादयोऽग्निप्रकरणाम्नाताश्चत्वारो मन्त्रा लिङ्गादेवाग्न्यङ्गेष्टकार्थमृत्खननसाधनीभूताभ्र्यादाने प्राप्ता इति (२)'तां चतुर्भिरादत्त' इति वचनं व्यर्थम् ।

न च चतुस्सङ्ख्याविधानार्थं तत्; सा ह्यादानोद्देशेन वा विधीयते मन्त्रोद्देशेन वा ? न तावदाद्यः, सङ्ख्याया (३) 'स्तिस्र आहुती' रितिवत्कर्मसामानाधिकरण्याभावेन साक्षादादानसबन्धायोगात् । न चारुणैकहायनीन्यायेन मन्त्रसामानाधिकरण्योपपत्तिः । तत्रैकहायन्या अप्राप्तत्वेन विधेयत्वात्तत्परिच्छेदकापेक्षायां युक्तः पार्ष्ठिक आरुण्येन सम्बन्धः । मन्त्राणां तु लिङ्गादेव विकल्पेनैकसङ्ख्यानां प्राप्तत्वेन परिच्छेदकानपेक्षत्वान्न ग्रहैकत्ववद्युक्तश्चतुस्सङ्ख्यायास्सम्बन्धः । नान्त्यः, स्वरूपेणैव मन्त्राणां चतुस्सङ्ख्यात्वेन वचनवैयर्थ्यात् । आदान-

१. तै. सं. ४. १. १. २. तै. सं. ५. १. .१ ३. तै. सं. २. ३. ९.

विशिष्टमन्त्रोद्देशेन सङ्ख्याविधौ विशिष्टोद्देशे वाक्यभेदः। उभयाविशिष्टादानविधिपक्षस्तु आदानस्यार्थप्राप्तत्वान्मन्त्राणां लिङ्गादेव प्राप्तेरनाशङ्क्य एव। अतो न सङ्ख्याविधिः।

नापि समुच्चयविधिः, तद्वाचकशब्दाद्यभावात्। अस्मत्पक्षे तु चतुस्सङ्ख्याकमन्त्रोच्चारणस्याऽऽदानाङ्गत्वसिद्ध्यर्थो विधिरर्थवान्।

तथाग्निचयनप्रकरणाम्नात एव मन्त्रः (१)"इमामगृभ्णन्रशनामृतस्य" इत्ययं लिङ्गादेव तत्रत्याश्वरशनाग्रहणे प्राप्त इति पुनस्तत्र "(२)इत्यश्वाभिधानीमादत्त" इति वचनं व्यर्थम्; न ह्यत्र पूर्ववत्किञ्चिद्विधेयान्तरमप्याशङ्कितुं शक्यम्, आदानस्य स्वरूपेणाश्वाभिधानीसंस्कारार्थत्वेनार्थान्मन्त्रस्य च लिङ्गादेव प्राप्तेः। न च मन्त्रस्याश्वाभिधान्यादान इव लिङ्गाविशेषेण गर्दभरशनादानेऽपि प्राप्तेस्तत्परिसङ्ख्यार्थं वचनमर्थवद्भविष्यतीति वाच्यम्। परिसङ्ख्या हि प्राप्त्युत्तरकालं शाब्दी वा स्यात्? लैङ्गिकप्राप्तेः पूर्वमेवाश्वाभिधान्यादाने मन्त्रविधौ कृते पश्चाद्विधेः फलत्वेन वा? आद्येऽप्यादानविषयिणी मन्त्रविषयणी वा? नाद्यः, गर्दभरशनादानाभावे गर्दभबन्धनासम्भवेन रशनावैयर्थ्यप्रसङ्गात्। अश्वाभिधानीसम्बन्ध्यादानस्य श्रौतस्य सामर्थ्यादेव प्राप्तेरविधेयत्वात्स्वार्थस्य विधेयत्वहानिः, गर्दभाभिधान्यादाननिवृत्तेश्च लक्षिताया विधेयत्वात् परार्थस्य विधेयत्वकल्पना, अर्थाक्षेपप्रमाणेन प्राप्तस्य गर्दभरशनादानस्य बाधः, इति त्रैदोष्यापत्तेश्च। त्रैदोष्यापत्त्यैव गर्दभाभिधानीतो मन्त्रविषयपरिसङ्ख्यापक्षोऽपि निराकार्यः।

अथ लिङ्गस्यार्थाक्षेपस्य वा श्रुतिकल्पकत्वेन मन्त्र-

---

१. तै. सं. ४. १. २. २. तै. सं. ५. १. २.

रप्रवृत्तित्वात्ततः पूर्वमेवाऽश्वाभिधान्यङ्गत्वेन मन्त्रविधौ मन्त्रविशिष्टादानविधौ वा स्वार्थस्यैव विधेयत्वात्, परार्थे चाकाङ्क्षाविरहेण लिङ्गस्य श्रुत्यकल्पकत्वेन गर्दभरशनायां मन्त्रस्य प्रापकप्रमाणाभावेऽर्थसिद्धत्वेनाविधेयत्वात् । अत एव प्राप्त्यभावेन प्राप्तबाधस्याप्यभावात्, त्रैदोष्यानापत्तेः फलतः परिसङ्ख्यापक्षो युक्त इति चेत्

अश्वाभिधान्यङ्गत्वेन मन्त्रविशिष्टादानविधावप्यश्वाभिधानीस्वरूप आनर्थक्यप्रसङ्गेनापूर्वसाधनत्वलक्षणायां रशनाद्वयस्याप्येकया प्रणाड्या एकापूर्वसाधनत्वा(१)द्यवेष्विवावघातादेर्मन्त्रस्य गर्दभरशनायामपि प्राप्तेर्दुर्वारत्वात् । अतो द्विविधाया अपि परिसङ्ख्याया असम्भवान्मन्त्रस्य लिङ्गाविनियोज्यत्वे वचनवैयर्थ्यापत्तिः; अस्मन्मते तु सत्यपि रशनाद्वयसाधारण्ये रशनाद्वयादानाङ्गत्वेनैव मन्त्रविधिरर्थवान् । तथा दर्शपूर्णमासप्रकरणाम्नातः (२) "उरुप्रथस्वोरु ते यज्ञपतिः प्रथता" मित्ययं मन्त्रः लिङ्गादेव तत्रत्यपुरोडाशप्रथने प्राप्त इति पुनः "इति पुरोडाशं प्रथयती" ति वचनं व्यर्थम् । न ह्यत्र पूर्ववन्मन्त्रस्यान्यनिवृत्तिश्शक्यते शङ्कितुम्; । लिङ्गेनान्यत्र प्राप्त्यभावात् ।

ननु अत्र प्रथनमेव विधीयते, न मन्त्रः, लिङ्गादेव प्राप्तेः । न च पुरोडाशान्यथानुपपत्त्या प्रथनमपि प्राप्तमेव । त्वराविशेषेणाऽप्रथितस्यापि पिष्टपिण्डरूपपुरोडाशस्य निष्पत्तिदर्शनादिति भवदेवेनोक्तत्वात् । अतः प्रथनमात्रविधायके वाक्ये लिङ्गप्राप्तमन्त्रोपादानं (३) "यज्ञपतिमेव तत्प्रजया पशुभिश्च

---

१. "व्रीहीनवहन्ती" त्यनेन विहितोऽप्यवघातो दर्शपूर्णमासापूर्वरूपैकापूर्वसाधनीभूतेषु यवेष्वपि यथा प्राप्नोति तद्वदित्यर्थः ।

२. तै. सं. १. १. ८. ३. तै. ब्रा. ३. २. ८.

प्रथयती" इत्यर्थवादकृतयज्ञपतिप्रथनफलकत्वरूपप्रथनस्तुत्यालम्बनोपपादनार्थम्। मन्त्रे हि पुरोडाशं प्रत्यध्वर्युर्ब्रूते—उरु ते यज्ञपतिः प्रथतामिति, यश्चैवं ब्रूते स प्रथयत्येव। अतोऽध्वर्योराशीर्दानकर्तृत्वं यज्ञपतिप्रथनोत्पादनकर्तृत्वेनोपचर्यते। अतः पुरोडाशप्रथनस्तुतिसिद्धिः। तेन मन्त्रपुनश्श्रवणस्यार्थवादार्थत्वान्न वैयर्थ्यमिति चेन्न; मन्त्रोपादानाभावेऽपि लैङ्गिकविनियोगेन मन्त्रस्य तावत्प्राप्तत्वात्त्वदभिप्रेतस्तुतिसिद्धेः। पुरोडाशप्रथनस्याप्यर्थप्राप्तत्वेनाविधेयत्वाद्विधिशेषत्वायोगेनार्थवादत्वस्यैवानुपपत्तेश्च।

न च भवदेवोक्तविधया प्रथनविधिश्शङ्क्यः, अष्टाकपालादिशब्दैरेवाष्टसङ्ख्यावच्छिन्नकपालाधिकरणसंस्कारसंस्कृतद्रव्यविधानात् "कपालेषु पुरोडाशं श्रपयती" ति च तादृशस्यैवाधिकरणत्वस्यानुवादात्कपालाधिकरणत्वस्यैव प्राप्तेः, तस्य च प्रथनमन्तरेणायोगात्प्रथनस्य प्राप्तत्वेन विध्यनुपपत्तेः। न च पिष्टस्य द्रवतरत्वे सति स्वत एव प्रथनसम्भवात् तदनुकूलकर्तृव्यापारविधानम्। तदा हि तादृशमेव पिष्टं क्रियते येन प्रथयितव्यं भवतीति वाच्यम्। कपालोपरि निधानात्पूर्वमेव "(१)मखस्य शिरोऽसीत्याह यज्ञो वै मखः, तस्यैतच्छिरः, यत्पुरोडाशः" इति वाक्येन समन्त्रकपिष्टपिण्डरूपपुरोडाशकरणस्योक्तत्वात्, द्रवतरकरणे च पिण्डासम्भवात् स्वतः प्रथनासम्भवेन यावत्कपालाधिकरणतासम्पत्त्यै प्रथनकर्तव्यताया अपि नित्यप्राप्तत्वात्। अतो विधेयाभावेन तदर्थवादत्वस्यैवायोगात्तदर्थत्वेनाऽर्थवन्मन्त्रपुनश्श्रवणमिति दुर्घटम्। अस्मन्मते तु प्रथनानुवादेनापूर्वस्य मन्त्रस्य विधेयत्वात् स्तुतित्वेन चार्थवादत्वस्योपपत्तेः न

१. तै. ब्रा. ३. २. ८.

किञ्चिदनर्थकम् । अतश्च मन्त्रप्रामाण्ये तेषां विनियोजकरूपार्थशास्त्रवैयर्थ्यप्रसङ्गादुच्चारणमात्रद्वारेण च प्रधानोपकारकत्वोपपत्तेरप्रामाण्यमेव युक्तमाश्रयितुम् ॥ ३३ ॥

वाक्यनियमात् ॥ १-२-३४ ॥

(१)"अग्निर्मूर्धा दिवः ककु" दित्यादौ नियतक्रमकपदसमूहरूपवाक्याम्नानमुच्चारणार्थत्वपक्षे व्युत्क्रमे उच्चारणजन्यादृष्टप्रमाणाभावादर्थवत्, अर्थप्रत्यायनार्थत्वपक्षे तु व्युत्क्रमेऽपि मूर्धाग्निरित्युच्चारणादर्थप्रत्ययस्याविशेषान्नियतक्रमकपदसमूहरूपवाक्याम्नानमनर्थकम् । न चार्थपराणामपि प्रकृतिप्रत्ययसमासादिपदानां यजेत, इन्द्राग्नी, नीलोत्पलं, राजपुरुषः, निष्कौशाम्बिरित्यादीनां क्रमनियमो दृश्यत एवेति वाच्यम् । तेषु विपर्ययेऽपशब्दत्वप्रसङ्गात् । तथा हि—

प्रत्ययस्य तावत्परत्वं "(२)प्रत्ययः परश्च" अनेनैव प्रसिद्धम् । इन्द्रशब्दस्य च "(३)अजाद्यदन्त" मित्यनेन पूर्वनियमः । नीलशब्दस्य च विशेषणत्वात् '(४)विशेषणं विशेष्येण बहुल' मित्यनेन च प्रथमानिर्दिष्टस्य विशेषणस्य "(५)प्रथमानिर्दिष्टं समास उपसर्जन" मित्यनेनोपसर्जनसंज्ञायां कृतायां, "(६)उपसर्जनं पूर्व"मिति पूर्वनिपातः। राजशब्दस्य च षष्ठ्यन्तत्वात् "(७)षष्ठी" त्यनेन प्रथमानिर्दिष्टस्य पूर्ववदेव निपातः । चित्रशब्दस्य विशेषणत्वात् "(८)सप्तमीविशेषणे बहुव्रीहा"वित्यनेन पूर्वनिपातः । निरादीनाञ्च "(९)निरादयः क्रान्ताद्यर्थे पञ्चम्ये" त्यनेन

---

१. तै. सं. ४. ४. ४.　२. पा. सू. ३. १. १.　३. पा. सू. २. २. ३३
४. पा. सू. २. १. ५७. ५. पा. सू. १. २. ४३. ६. पा. सू. २. २. ३०.
७. पा. सू. २. २. ८. ८. पा. सू. २. २. ३५. ९. वा १. ४. १७.

प्रथमानिर्दिष्टानां पूर्वनिपातः । अतस्सर्वत्र विपर्ययेऽपशब्दत्वापत्तेः क्रमनियमाश्रयणम् । यत्तु "अग्नीन्द्रा" वित्याश्वलायनसूत्रे प्रयोगः, स इन्द्रशब्दस्योक्तरीत्या पूर्वनिपातस्मरणात् "(१)देवताद्वन्द्वे चे" ति स्मृतस्यानङोऽप्यदर्शनाच्छान्दस एव । राजपुरुषादिषु त्वर्थान्यत्वादपि क्रमनियमाश्रयणम् । निष्कौशाम्बिरित्यादौ च विपर्यये ऽर्थशून्यत्वादपि तत् । "अग्निर्मूर्द्धे" त्यादौ तु विपर्ययेऽप्यसाधुत्वादीनामभावात्क्रमनियमानर्थक्यम् ।

न चेहापि क्रमान्यत्वे अमन्त्रत्वापत्तिः; नियमार्थवतां मते हि मन्त्रस्याखण्डत्वात्क्रमान्यत्वेऽमन्त्रत्वं स्यात् । तव तु ज्ञानार्थत्वान्मनोतेर्मन्यतेर्वा "(२)गुधृवीपचिवचियमिमनितनिसदिच्छदिक्षिदिभ्यस्त्रः" इत्यौणादिके 'त्र' प्रत्यये कृते मन्त्रशब्दव्युत्पत्तिरूपान्वाख्यानानुरोधेनार्थज्ञापकत्वातिरिक्तस्य मन्त्रत्वस्याभावात्, विपर्ययेऽपि च तदनपायादमन्त्रत्वानापत्तेः क्रमानर्थक्यम् । न च क्रमनियमाददृष्टं कल्प्यते । तथा सति मन्त्रनियमादृष्टस्याप्यर्थप्रत्यायनार्थत्वपक्षेऽत्र कल्प्यत्वेन द्विरदृष्टकल्पनापत्तेः । अस्मन्मते तु नियतक्रमोच्चारणादेकमेवादृष्टमिति लाघवम् ॥ ३४ ॥

बुद्धशास्त्रात् ॥ १-२-३५ ॥

(३)"अग्नीदग्नीन्विहर" इत्यादावाग्नीध्रेण स्वकर्तव्येष्वग्निविहरणादिषु प्रयोगाद्बहिरेवावधारितेषु पुनः प्रैषशास्त्रं पिष्टपेषणन्यायेनानर्थकम् । न चाविद्वद्विषयत्वेन प्रैषस्यार्थवत्ता(४)"न

---

१. पा. सू. ६. ३. २६. २. पा. उ. सू. ६१६.
३. तै. सं. ६. ३, १. ४. जै. सू. ३. ८ १८,

ह्यविद्वान्विहितोऽस्ती” त्यनेन न्यायेन यजमानस्येव ऋत्विजामप्यविदुषामनधिकारात् ।

न च प्रयोगाद्बहिरवबुद्धानामपि प्रयोगान्तस्स्मरणार्थं प्रैषोपयोगः, ब्राह्मणाभ्यासजनितसंस्कारादेव पूर्वपदार्थसमाप्त्युद्बुद्धात्स्मरणोपपत्तेः, अस्मत्पक्षे तु नैतद्दोषप्रसक्तिः ॥ ३५ ॥

अविद्यमानवचनात् ॥ १-२-३६ ॥

(१)“चत्वारि शृङ्गा त्रयो अस्य पादा” इत्यादौ चतुश्शृङ्गत्वादिमतः कर्मणः तत्सम्बन्धिनो वा द्रव्यादेः प्रकृतौ विकृतौ वाऽप्रसिद्धेर्न तत्प्रकाशनार्थत्वेनास्यार्थवत्तासम्भवः । यद्यपि च गौण्या वृत्त्या होत्रादीनामेव यज्ञशृङ्गत्वाद्युपचर्य यज्ञाभिधानं, तथापि गौणरूपस्यानुष्ठेयत्वाभावान्न स्मृत्या कार्यम् । यज्ञप्रकाशनेऽपि च प्रधानमात्रप्रकाशनस्य याज्यादिनैव सिद्धत्वात् प्रयोगप्रकाशने च प्रयोगस्य विततत्वेनास्मिन्प्रदेशेऽस्य प्रयोग इत्यनवधारणात् । प्रयोगोपक्रमस्य च कामनाद्यनुरोधेनैव बुद्धिस्थत्वेन स्मारकानपेक्षत्वात् सर्वदोच्चारणशङ्कनुपपत्तेः पाठक्रमानुरोधेनैवास्योच्चारणापत्तेर्नानुष्ठेयार्थप्रकाशनार्थत्वोपपत्तिः। एवम् “मा मा हिंसी” रित्याद्यप्यप्रसक्तायां हिंसायां हिंसाप्रतिषेधानर्थक्यादविद्यमानार्थकमुदाहर्तव्यम् ॥ ३६ ॥

अचेतनेऽर्थबन्धनात् ॥ १-२-३७ ॥

न खलु(२) “ओषधे त्रायस्वैनं”(३) “शृणोत ग्रावाणः” इत्यादीनां पशुत्राणविषये अचेतनस्य दर्भस्य (४)प्रातरनुवाक-

---

१. ऋ. सं. ३. ८. १०. २. तै. सं. १. २. १. ३. तै. सं. १. ३. १३

४. ज्योतिष्टोमे प्रातस्सवने होत्रा पठ्यमानश्शस्त्रविशेषः।

श्रवणविषये चाचेतनानां ग्राव्णामाभिमुख्यासम्भवेन सम्बोधना-नर्हत्वात्प्रैषरूपत्वमर्थविवक्षायामुपपत्तिमत् ॥ ३७ ॥

अर्थविप्रतिषेधात् ॥ १-२-३८ ॥

(१)"अदितिर्द्यौरदितिरन्तरिक्ष"मित्यादावदितेर्देवतायाश्शब्दरूपत्वेनैव तावद्द्युत्वादि विप्रतिषिद्धम्। पुनश्चैकस्या एव द्युत्वमन्तरिक्षत्वं च तथा। न च स्तुत्यर्थत्वेनाविरोधः, आर्थवादिकस्तुतिवन्मान्त्रवर्णिकयाः स्तुतेः प्रदेशान्तरस्थत्वेन विधिनाऽग्रहणस्य (२)द्वितीये वक्ष्यमाणत्वात्, स्वतन्त्रायास्स्तुतेश्चानुपयोगात्॥ ३८॥

स्वाध्यायवदवचनात् ॥ १-२-३९ ॥

स्वाध्यायाध्ययनकाले हि यत् कर्मण्युपयुक्तं तस्याभ्यासः कार्यः, नान्यस्य। तद्यद्यर्थप्रकाशनस्य उपयोगः, तदा तदेवाभ्यस्येत। अक्षराणामेवेत्वभ्यासात्तदुच्चारणमेवोपयोगीति निश्चीयते ॥३९॥

अविज्ञेयात् ॥ १-२-४० ॥

(३)"अम्यक् सा त इन्द्र ऋष्टिरस्मे" इत्यादौ सामान्यत इन्द्रस्तुतिरूपवाक्यार्थावगमेऽप्यम्यगादिपदार्थाज्ञानात् विशेषतो वाक्यार्थाज्ञानम्। (४)"सृण्येव जर्भरी" त्यादौ सामान्यतोऽपि वाक्यार्थानवगमात्। अर्थप्रत्यायनार्थत्वपक्षे किमेते अभिदध्युः? ॥४०॥

अनित्यसंयोगान्मन्त्रानर्थक्यम् ॥१-२-४१॥

(५)"किं ते कृण्वन्ति कीकटेषु गावो नाशिरं दुह्रे न तप-

---

१. ऋ. सं. १. ६. १६. २. पू. मी. २. १. ६. अधिकरणे।
३. ऋ. सं. २. ४. ८. ४. ऋ. सं. ८. ६. २. ५. ऋ. सं. ३. ३. २१.

न्ति घर्मम् । आ नो भर प्रमगन्दस्य वेदो नैचाशाखम्मघवन्त्रन्धया नः" इत्यादावनित्यार्थप्रतिपादनात् , तस्य चाकर्माङ्गत्वात्प्रतिपादनमनर्थकम् । तथाहि–एतस्य हि विश्वामित्र ऋषिः । तेन किल इन्द्रः प्रार्थितः,–भो मघवन् ! कीकटेषु देशविशेषेषु, या गावस्ताः ते तव, किं कुर्वन्ति ? यतः आशिरं सोमसंस्कारार्थं पयः, न दुह्रे, न च घर्मं तपन्ति, अतः प्रमगन्दस्य राज्ञः, नैचाशाखं नाम नगरं, वेदः धनं च, नः अस्माकं, आभर, इत्येतन्नो मघवन् , रन्धय साधयेति । दीर्घश्छान्दसः । अत्र नैचाशाखप्रमगन्दादीनामनित्यानां संयोगान्मन्त्रानर्थक्यमिति पूर्वः पक्षः ॥ ४१ ॥

(इति पूर्वः पक्षः)

अविशिष्टस्तु वाक्यार्थः ॥ १-२-४२ ॥(सि)

(सिद्धान्तः)

सिद्धान्तस्तु–नोच्चारणार्था मन्त्राः । तथाहि–उच्चारणं प्रति मन्त्राणां विषयतासम्बन्धेन कारणत्वात् उच्चारणस्य मन्त्रजन्यत्वेऽपि तस्य क्रत्वनपेक्षितत्वेनादृष्टार्थत्वापत्तेः, दृष्टे सम्भवत्यदृष्टकल्पनस्यान्याय्यत्वाच्च, उच्चारणस्य द्वारत्वानुपपत्तेः मन्त्राणां च श्रुत्यादिबोधितक्रत्वङ्गभावानां साक्षाद्व्यापारं विना क्रत्वङ्गत्वानुपपत्तेः, व्यापारापेक्षायामर्थाभिधानमेव व्यापारत्वेनाङ्गीक्रियते । उच्चारणस्य पुंव्यापारत्वेन मन्त्रनिष्ठत्वाभावान्मन्त्रनिष्ठस्यार्थाभिधानस्यैव तद्व्यापारत्वकल्पनौचित्याच्च । अतश्चानुष्ठेयार्थप्रतिपादकानां करणमन्त्राणां तावदनुष्ठानहेतुभूतस्मृतिजनकत्वात् कर्मौपयिकार्थाभिधानस्य तेषु व्यापारत्वं सुलभमेव ।

यत्रापि मन्त्रात्स्वरसतो नानुष्ठेयार्थावगतिः, इतिकरणादिना च मन्त्रो विनियुज्यते (१)"इषे त्वेति शाखामाच्छिनत्ति" (२)"चतुर्होत्रा पौर्णमासीमभिमृशेत्" "याज्यया यजती" त्यादौ तत्रापि शब्दस्यार्थाभिधानद्वारं विना दृष्टविधयाऽन्यद्वारा करणत्वासम्भवादध्याहारादिनाऽप्यर्थाभिधानस्यैव व्यापारत्वम् ।

क्रियमाणानुवादिषु तु(३) "युवा सुवासा" इत्यादिषु यद्यप्यर्थाभिधानं न स्वरसतः कर्मविध्यपेक्षितम् , तथाऽपि यूपपरिव्याणादिक्रियाया अनेकक्षणव्यासक्तत्वेन कदाचिन्मध्येऽपि बुद्धिविच्छेदे सति स्मृतिसिध्यर्थं स्मारकापेक्षोपपत्तेः, अनाकाङ्क्षितत्वेऽपि वा मन्त्राकाङ्क्षयैव कर्मणामप्याकाङ्क्षोत्थापनसम्भवात् कर्मणोऽप्याकाङ्क्षां परिकल्प्यानुष्ठीयमानकर्मस्मृतिदार्ढ्यहेतुत्वेन दृष्टविधयैव मन्त्रान्वयोपपत्तौ अदृष्टार्थोच्चारणार्थत्वकल्पनानुपपत्तेरर्थाभिधानस्यैव व्यापारत्वम् ।

अत एव "युवा सुवासाः परिवीत आगादित्याहे" त्याहशब्दस्य ब्रूञादेशत्वेन वच्यपरपर्यायब्रूञर्थपरिभाषणरूपार्थाभिधानपरत्वादाहशब्देन विनियोगोऽप्यवकल्पते । अत एवानुमन्त्रणजपादिमन्त्रेष्वपि वेदे प्रायश आहशब्दोपबन्धादर्थाभिधानव्यापारकत्वसिद्धिः । अतएवोक्तं(४) तन्त्रसारे—

---

१. आप. श्रौ १. १. ११. आपस्तम्बश्रौतसूत्रस्यार्थतोऽनुवादोऽयम् ।
२. आप. श्रौ. २. ११. ५. ३. ऋ. सं. ३. १. ३.
४. ग्रन्थोऽयं न्यायसुधाकारेण भट्टसोमेश्वरेण रचित इति तत्र तत्र ग्रन्थेषूल्लेखनादवगम्यते । परं तु अनुपलम्भदोषदूषितः ।

"इत्याहोपनिबन्धश्च मन्त्राणां दृश्यते विधिः ।
ब्रूयादेशश्चाहशब्दस्सोऽभिधानाभिधायक" इति ॥

(१)न्यायसुधायामपि—

"सर्वसाधारणत्वेन विचारस्य प्रयोजनम् ।
कर्मकाले ऽनुसन्धेयो मन्त्रार्थोऽर्थपरत्ववत" इति ॥

तत्रानुमन्त्रणमन्त्रेषु तावत् कृतस्यापि यागादेरकृतत्वशङ्कायां (२)"यदेव श्रद्धया करोति" सेतद्वाक्यविहितश्रद्धाभावनिमित्तवैगुण्यापत्तेस्तन्निवृत्त्यर्थं कृतप्रत्यवेक्षापेक्षत्वात् । अनपेक्षत्वेऽपि वा पूर्ववदाकाङ्क्षोत्थापनेनानुष्ठितकर्मस्मृतिदार्ढ्यहेतुत्वकल्पनात् दृष्टविधयैवार्थाभिधानव्यापारकत्वम् । अत एव—

"मन्त्रमुच्चारयन्नेव मन्त्रार्थत्वेन संस्मरन् ।
शेषिणं तन्मना भूत्वा स्यादेतदनुमन्त्रणम्" ॥

इति तल्लक्षणमपि सङ्गच्छते ।

एवं च यत् तन्त्ररत्नेऽनुमन्त्रणमन्त्राणामदृष्टार्थत्वमुक्तं पञ्चमे, तदनादरादिति(३)तत्रैवोपपादयिष्यामः ।

एवं यत्रापि प्रमाणान्तरेण करणमन्त्रादीनामपि समुच्चयावगमः, तत्राऽप्येकेन स्मृतिसिद्धावन्येषां पूर्ववदाढ्यार्थत्वकल्पनाद्दृष्टविधयैवाभिधानव्यापारकत्वम् ।

एवं प्रोत्साहनार्थानामपि (४)"अगन्म सुवः" रित्यादीनां श्रद्धाजननार्थमननुष्ठेयस्यापि कर्मसमवेतस्य फलादेस्स्मृतेरपेक्षितत्वात्तदर्थत्वेन दृष्टविधयैवोक्तव्यापारासिद्धिर्नवमे(५)भाष्य एवो-

---

१. न्याय सु. पृ. ९८.   २. छा. उ. १. १. १०.
३. भाट्टदीपिकायां पञ्चमप्रथमस्य तृतीयाधिकरणे ।
४. तै. सं. १. ६. ६. । ५. पू. मी. ९. १. ३.

पपादिता। उपस्थानमन्त्रेषु तु अभिधानार्थत्वं (१)सप्तम एवोपपादयिष्यते ।

एवं स्तोत्रशस्त्रमन्त्राणामपि गुणरूपस्तुत्यङ्गत्वेन क्रमादिनाऽवगतानां स्पष्टमेवाऽभिधानार्थत्वम् । अभिधानरूपयोः स्तोत्रशस्त्रयोः परमारादुपकारकत्वं (२)द्वितीये साधितमित्यविरोधः।

नचैवं "सूक्तं शंसती"त्यादौ सूक्तस्याभिधानं प्रति कर्मत्वासम्भवात्, अतएव शक्त्या अर्थप्राप्त्यभावेन सक्त्वादिवल्लक्षणया विनियोगभङ्गशङ्कानुपपत्तेरगत्या शंसतेरुच्चारणलक्षकत्वावसायात्, उच्चारणे च सूक्तादीनां कर्मत्वोपपत्तेरुच्चारणार्थत्वमेव युक्तमिति वाच्यम् । 'गां दोग्धि पय' इत्यादित्

"दुह्याच्पच्दण्ड्रुधि प्रच्छि चि ब्रूञ्शासु जि मथ्मुषाम् ।
कर्मयुक्स्यादकथितं तथा स्यान्नीहृकृष्वहाम्" ॥

इति महावार्तिकात् (३)"अकथितं चे"ति सूत्राच्च, दुहादिधातूनां कर्मकारकेण युक्तस्याऽप्यपादानादिकारकविशेषैरविवक्षितस्य कर्मसंज्ञास्मरणात्, "अर्थनिबन्धनेयं संज्ञे" ति स्मरणाच्च ब्रूञ्समानार्थकस्य शंसतेरपि कर्मकारकेण गुणेन युक्तस्य सूक्तादेः कर्मसंज्ञोपपत्तेर्द्वितीयाविरोधाभावात् ।

न च सूक्तस्यास्मिन्वाक्ये करणत्वरूपकारकविशेषस्य विवक्षितत्वात् कर्मसंज्ञानुपपत्तिः; सूक्तस्य क्रमादिप्रमाणान्तरेण शस्त्राङ्गत्वस्य सिद्धत्वादस्मिन्वाक्येऽविवक्षायामपि बाधकाभावात् । शंसतेरुच्चारणलक्षकत्वे "देवताश्शंसती" त्यत्र देवतानामुच्चारणकर्मत्वस्य कथमप्यनुपपत्तेश्च । अत उपपन्नं

१. पू. मी. ७. ३. १२. २. पू. मी. २. १. ६. ३. पा. सू. १. ४. ५१.

स्तोत्रशास्त्रमन्त्राणामप्यर्थाभिधानार्थत्वम् ॥

जपादीनां तु "वैष्णवीमृचमनूच्य वाचं यच्छती"त्यत्रा-नूच्येति वच्यर्थाभिधानार्थत्वस्य स्फुटमवगमात्, "याः पुर-स्तादिति जपे" दित्यादावपि "जपन्त्यक्तायां वाची" त्यनेन वच्यर्थाभिधानार्थत्वावगमात्, अर्थस्य च कर्मासमवेतत्वेऽपि तदभिधानस्यादृष्टार्थत्वोपपत्तेः, न मन्त्राणामुच्चारणार्थत्वं क-ल्पनीयम् । अत एव(१)"मन्त्रो हीनस्स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह" इत्यादीनि स्वरयुक्तजपादिमन्त्रा-णामप्यर्थपरत्वलिङ्गानि सामान्यतः प्रवृत्तानि न सङ्कोचितानि भवन्ति ।

यत्तु (२)द्वादशे जपादीनामदृष्टार्थत्वमुक्तम्, तन्मन्त्रसाध्या-र्थाभिधानस्यादृष्टार्थत्वाभिप्रायेण । अस्तु वा जपादीनां कर्मा-समवेतार्थाभिधायिनामुच्चारणमात्रार्थत्वम्, नैतावता कर्मसमवे-तार्थाभिधायिनामपि करणमन्त्रादीनां दृष्टविधयोपयोगसम्भ-वेऽदृष्टार्थोच्चारणार्थत्वकल्पना युक्ता । न चानुष्ठेयार्थस्मृतेर्ध्याना-द्युपायान्तरेणापि सिद्धेर्मन्त्रानर्थक्यम् । मन्त्राम्नानानुपपत्त्या मन्त्रेणैव स्मर्तव्यमिति नियमकल्पनात् । तस्य चावघातनियम-स्येव दृष्टासम्भवेनादृष्टार्थत्वकल्पनोपपत्तेरुपायान्तरनिवृत्तिसि-द्धेः । यथा च क्रियाजन्यादृष्टकल्पनापेक्षया नियमादृष्टकल्पने लाघवं तथा(३)द्वितीय उपपादयिष्यामः ।

यत्तु वाचकमन्त्रस्मरणस्यार्थस्मरणाधीनत्वेन वैपरीत्यमु-क्तम्, तत् पूर्वपदार्थस्यैव मन्त्रस्मारकत्वोपपत्तेर्नावश्यमर्थ-स्मरणाधीनत्वमिति परिहर्तव्यम् ।

---

१. पा. शि. ५२. २. पू. मी. १२. ४. १. ३. पू. मी. २. १. ३.

पपादिता। उपस्थानमन्त्रेषु तु अभिधानार्थत्वं (१)सप्तम एवोपपादयिष्यते।

एवं स्तोत्रशस्त्रमन्त्राणामपि गुणरूपस्तुत्यङ्गत्वेन क्रमादिनाऽवगतानां स्पष्टमेवाऽभिधानार्थत्वम्। अभिधानरूपयोः स्तोत्रशस्त्रयोः परमारादुपकारकत्वं (२)द्वितीये साधितमित्यविरोधः।

नचैवं "सूक्तं शंसती"त्यादौ सूक्तस्याभिधानं प्रति कर्मत्वासम्भवात्, अतएव शक्त्या अर्थप्राप्त्यभावेन सक्त्वादिवल्लक्षणया विनियोगभङ्गशङ्कानुपपत्तेरगत्या शंसतेरुच्चारणलक्षकत्वावसायात्, उच्चारणे च सूक्तादीनां कर्मत्वोपपत्तेरुच्चारणार्थत्वमेव युक्तमिति वाच्यम्। 'गां दोग्धि पय' इत्यादिवत्

"दुह्याच्पच्दण्ड्रुधि प्रच्छि चि ब्रूञ्शासु जि मथ्मुषाम्।
कर्मयुक्स्यादकथितं तथा स्यान्नीहृकृष्वहाम्"॥

इति महावार्तिकात् (३)"अकथितं चे"ति सूत्राच्च, दुहादिधातूनां कर्मकारकेण युक्तस्याऽपादानादिकारकविशेषैरविवक्षितस्य कर्मसंज्ञास्मरणात्, "अर्थनिबन्धनेयं संज्ञे" ति स्मरणाच्च ब्रूञ्समानार्थकस्य शंसतेरपि कर्मकारकेण गुणेन युक्तस्य सूक्तादेः कर्मसंज्ञोपपत्तेर्द्वितीयाविरोधाभावात्।

न च सूक्तस्यास्मिन्वाक्ये करणत्वरूपकारकविशेषस्य विवक्षितत्वात् कर्मसंज्ञानुपपत्तिः; सूक्तस्य क्रमादिप्रमाणान्तरेण शास्त्राङ्गत्वस्य सिद्धत्वादस्मिन्वाक्येऽविवक्षायामपि बाधकाभावात्। शंसतेरुच्चारणलक्षकत्वे "देवताश्शंसती" त्यत्र देवतानामुच्चारणकर्मत्वस्य कथमप्यनुपपत्तेश्च। अत उपपन्नं

---

१. पू. मी. ७. ३. १२. २. पू. मी. २. १. ६. ३. पा. सू. १. ४. ५१.

स्तोत्रशस्त्रमन्त्राणामप्यर्थाभिधानार्थत्वम् ॥

जपादीनां तु "वैष्णवीमृचमनूच्य वाचं यच्छती"त्यत्रानूच्येति वच्यर्थाभिधानार्थत्वस्य स्फुटमवगमात्, "याः पुरस्तादिति जपे" दित्यादावपि "जपव्यक्तायां वाची" त्यनेन वच्यर्थाभिधानार्थत्वावगमात्, अर्थस्य च कर्मासमवेतत्वेऽपि तदभिधानस्यादृष्टार्थत्वोपपत्तेः, न मन्त्राणामुच्चारणार्थत्वं कल्पनीयम् । अत एव(१)"मन्त्रो हीनस्स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाहे" त्यादीनि स्वरयुक्तजपादिमन्त्राणामप्यर्थपरत्वलिङ्गानि सामान्यतः प्रवृत्तानि न सङ्कोचितानि भवन्ति ।

यत्तु (२)द्वादशे जपादीनामदृष्टार्थत्वमुक्तम्, तन्मन्त्रसाध्यार्थाभिधानस्यादृष्टार्थत्वाभिप्रायेण । अस्तु वा जपादीनां कर्मासमवेतार्थाभिधायिनामुच्चारणमात्रार्थत्वम्, नैतावता कर्मसमवेतार्थाभिधायिनामपि करणमन्त्रादीनां दृष्टविधयोपयोगसम्भवेऽदृष्टार्थोच्चारणार्थत्वकल्पना युक्ता । न चानुष्ठेयार्थस्मृतेर्ध्यानाद्युपायान्तरेणापि सिद्धेर्मन्त्रानर्थक्यम् । मन्त्राम्नानानुपपत्त्या मन्त्रेणैव स्मर्तव्यमिति नियमकल्पनात् । तस्य चावघातनियमस्येव दृष्टासम्भवेनादृष्टार्थत्वकल्पनोपपत्तेरुपायान्तरानिवृत्तिासिद्धेः । यथा च क्रियाजन्यादृष्टकल्पनापेक्षया नियमादृष्टकल्पने लाघवं तथा(३)द्वितीय उपपादयिष्यामः ।

यत्तु वाचकमन्त्रस्मरणस्यार्थस्मरणाधीनत्वेन वैपरीत्यमुक्तम्, तत् पूर्वपदार्थस्यैव मन्त्रस्मारकत्वोपपत्तेर्नावश्यमर्थस्मरणाधीनत्वमिति परिहर्तव्यम् ।

---

१. पा. शि. ५२. २. पू. मी. १२. ४. १. ३. पू. मी. २. १. ३.

यदपि करणमन्त्रे द्वित्राणामेव पदानां कर्मसमवेतार्थाभिधायित्वेऽपीतरेषां "देवस्यत्त्वे" त्यादीनामुच्चारणार्थत्वमावश्यकमिति तदपि "देवस्यत्वे" त्यादिपदानामेवोच्चारणमात्रार्थत्वे भिन्नप्रयोजनकत्वेन "निर्वपामि" पदैकवाक्यताभङ्गापत्तेस्तद्वशाद्देवस्यत्वेत्यादिपदार्थविशिष्टनिर्वापप्रकाशनस्यैवाभ्युदयकारित्वकल्पनया तेषामपि स्वार्थाभिधायकत्वस्य(१)नवमे वक्ष्यमाणत्वादकिञ्चित्करम् । तेन सिद्धं मन्त्राणामर्थप्रत्यायनार्थत्वम् ।

नचैवं मन्त्राक्षरानुसन्धानमात्रेणैव मन्त्रार्थानुसन्धानसिद्धेः कर्मकाले मन्त्रोच्चारणानापत्तिः, मन्त्राणां तदनुसन्धानस्य वा स्वतः पुरुषव्यापाराविषयत्वेन मन्त्रविनियोजकविधिविषयत्वायोगात् विधिविषयत्वासिद्ध्यर्थं मन्त्राविषयोच्चारणस्यावश्यं कल्पनीयत्वात् ।

नचैवमनुसन्धानानुकूलव्यापारस्यैव विधिविषयत्वं कल्प्यतां किमुच्चारणेनेति वाच्यम् ? उच्चारणस्य मन्त्रविषयत्वात् , मन्त्रविषयकानुसन्धानजनकव्यापारापेक्षया प्रत्यासन्नत्वेन तस्यैव मन्त्रविनियोजकविधिविषयत्वौचित्यात् । उच्चारणविधानाभावे उच्चारणैकान्तिकोच्चैष्ट्वादिस्वरविध्यनुपपत्तेश्च ।

अत एव(२) "मिथ्या प्रयुक्त" इति प्रयोगरूपोच्चारणानुवादोऽप्युपपद्यते । तेन कर्मकाले उच्चारणसंस्कृतानामेव ऋगादिमन्त्राणामुपयोग इति सिद्धम् ।

साममन्त्राणां तु गीत्यात्मकत्वेनार्थाभावात्तदभिधानद्वारोपयोगासम्भवेऽपि ऋगक्षराभिव्यक्तिद्वारा गुणाभिधानरूपस्तोत्रकरणत्वात् दृष्टविधयैवोपयोगसम्भवे नादृष्टार्थोच्चारणप्रयोजनकत्वकल्पना युक्तेति(३)नवमे निरूपयिष्यते । अतएव

---

१. पू. मी. ९. १. १२. २. 'मन्त्रो हीन' इत्यस्य खण्डोऽयम् ।
३. पू. मी. ९. २. २.

"साम्ना स्तुवीते" ति तृतीयया साम्नः स्तोत्रं प्रति करणत्वमुक्तम् ।

न चैवं साम्नस्सन्ध्यक्षरेषु विश्लेषरूपकगक्षराभिव्यक्तिजनकत्वेऽपि तदभाव एव सन्ध्यक्षरैर्गुणाभिधानरूपस्तोत्रजननात् कथं स्तोत्रकरणत्वं साम्न इति वाच्यम् ? प्रगीतमन्त्रसाध्यगुणसम्बन्धाभिधानव्यक्तेरेवाभियुक्तप्रसिध्या स्तोत्रपदवाच्यत्वात् । अन्यथा शस्त्रादावपि गुणाभिधानस्य सत्वेन स्तोत्रपदप्रयोगापत्तेः । तादृशस्य च गीतिरूपसामाभावेऽनिष्पाद्यमानत्वेन करणत्वोपपत्तेः । अतश्चार्थाभिधानविशेषकरणत्वं साम्नामप्यव्याहतमेव ।

यश्चाऽत्र(१)स्तोभाक्षराधिरूढो गीत्यंशः, तस्यार्थाभिधानकरणत्वासम्भवाददृष्टार्थत्वम् । अतश्च रथन्तरादिसाम्नामाश्रयिकर्मवदुभयार्थत्वम् । यानि त्वनृक्कानि प्रजापतिहृदयादीनि, तेषां स्तोभाक्षराधिरूढत्वात् , स्तोभाक्षराणां चाभिधेयशून्यत्वस्य नवमे(२) वक्ष्यमाणत्वात् नाऽर्थाभिधानरूपस्तोत्रकरणत्वमित्यगत्या सामविनियोगानुसारेणोच्चारणमात्रद्वाराऽदृष्टार्थत्वमेव ।

न च तत्राऽपि स्तोभाक्षराभिव्यक्त्यर्थत्वेन साम्नो दृष्टार्थत्वमेव, स्तोभाक्षराणामेव परमुच्चारणद्वाराऽदृष्टार्थत्वकल्पनाऽस्त्विति वाच्यम्; स्तोभाक्षराणां गीतिकालपरिच्छेदकत्वेन दृष्टार्थत्वस्य (३)नवमे वक्ष्यमाणस्य सामान्तरेष्विवाऽनृक्सामस्वपि सम्भवेनाऽदृष्टार्थत्वकल्पनायां प्रमाणाभावात् । न च विनिगमनाविरहः, अनृक्साम्नां चयनादिकर्मणि विनियोगस्यैव विनिगमकत्वात् । अन्यथा हि स्तोभानामेव विनियोगः क्रियेत न साम्नां, अर्थसिद्धत्वात् । तत्सिद्धं सर्वमन्त्राणां प्रयोजनवत्त्वम् ।

१. स्तोभलक्षणं नवमे (९-२-१०.) द्रष्टव्यम् । २, ३. पू. मी. ९. २. ९.

नन्वेवं प्रयोजनवत्वे सिद्धेऽपि कथं प्रामाण्यम् ? न तावदनधिगतार्थगन्तृत्वलक्षणम्, विधिनाऽधिगतस्यैवाऽर्थस्य स्मरणात् । अत एवानुभावकत्वाभावान्न प्रमाकरणमिति चेत्—

अत्र भवदेवः—न प्रतिवेदवाक्यमनाधिगतार्थगन्तृत्वमुपपादनीयम् । (१)"य एवं विद्वान् पौर्णमासीं यजत" इत्यादावनुवादकत्वेन तदभावात् । किं तर्हि धर्मप्रमित्युपयोगित्वम् ? तच्च विद्वद्वाक्यस्येव मन्त्राणामप्युक्तविधया सम्भवत्येवेति नाप्रामाण्यशङ्केति । तत्र यद्यपि मन्त्रब्राह्मणसमुदायात्मके ग्रन्थविशेषे वेदत्वमेकं न प्रत्येकवाक्यवृत्ति, तथाऽपि न तदनाधिगतार्थगन्तृत्वप्रयोजकम्; अपि तु लौकिकवाक्यवद्वाक्यत्वमेव । अतश्च तस्य प्रत्येकवृत्तित्वाद्विधिवाक्यस्याऽनधिगतार्थगन्तृत्वसिद्धावपि मन्त्रवाक्यस्य तदसिद्धेरप्रामाण्यप्रसङ्गः । (२)"वेदोऽखिलो धर्ममूल" मित्यादिस्मृत्या अखिलवेदस्य धर्ममूलत्वस्मरणानुपपत्तिश्च ।

किञ्च मन्त्रजन्यस्मरणस्य धर्मोत्पत्त्युपयोगित्वेऽपि न धर्मप्रमोत्पत्त्युपयोगित्वम्, तदभावेऽपि विधिवाक्याद्धर्मप्रमोत्पत्तेर्जायमानत्वात् । अतो मन्त्राणां न परम्परयाऽपि धर्मप्रमोत्पत्त्युपयोगित्वम्। विद्वद्वाक्यस्य परम्परया धर्मप्रमोत्पत्त्युपयोगित्वेऽपि साक्षादप्यनधिगतार्थगन्तृत्वं समुदायप्रतीतेरनन्यलभ्यत्वादस्तीति वैषम्यम् ।

(३)सोमेश्वरस्तु—'बर्हिर्देवसदनं दामी' त्यादावपूर्वसाधनीभूतबर्हिर्लवनाङ्गत्वं मन्त्रसामर्थ्यादेवावगम्यत इति मन्त्रः स्वाङ्गत्वबोधे प्रमाणम् । क्वचिच्च मान्त्रवर्णिकद्रव्यदेवतायागादिकल्पनेऽपि प्रमाणम् । तच्च तत्र तत्राऽधिकरणे स्पष्टीभविष्यति ।

१. तै. सं. १. ६. ९. २. मनु. २. ६. ३. न्यायसु. पृ. ९८.

सर्वसाधारण्येन तु मन्त्रार्थाऽनुसन्धानकर्तव्यताविषये प्रामाण्यम् । मन्त्र एव हि स्वाङ्गत्वसिध्यर्थं स्वनिष्ठमर्थाभिधानाख्यं व्यापारं कल्पयतीति तत्र प्रामाण्यमित्याह ।

तदपि न, अर्थाऽनुसन्धानजनकत्वेन वा मन्त्राणां प्रामाण्यं मन्यसे ? अर्थाऽनुसन्धानरूपव्यापारकल्पकत्वेन वा ? नाद्यः ; अनुसन्धानस्य जपमन्त्रेष्वनधिगतविषयत्वेऽपि करणादिमन्त्रेष्वधिगतविषयत्वात् स्मृतिरूपत्वेन तज्जनकस्य प्रमाणत्वानुपपत्तेः । नान्त्यः; लिङ्गादिविनियुक्तेषु स्वयं तत्कल्पकत्वेऽपि स्तोत्रशस्त्रादौ 'आह' इत्येवं विनियुक्तेषु च त्वयैवाभिधानस्य क्लृप्तत्वाभिधानेनाऽव्यापकत्वात् । किञ्च साममन्त्रेष्वेवमप्यव्याप्तिर्दुर्वारा। तेषामर्थाभावेन तदनुसन्धानाजनकत्वात् । अथ तेषामपि प्रगीतमन्त्रसाध्यगुणाभिधानरूपस्तोत्रलक्षणशाब्दप्रमाजनकसामग्र्यन्तर्गतत्वेन प्रामाण्यं, ततोऽप्यनृक्साम्नां तदभावादप्रामाण्यापत्तिस्तदवस्थैव ।

एतेन मन्त्राणां स्मारकत्वेनानुभावकत्वघटितप्रमाकरणत्वरूपप्रामाण्याभावेऽपि यथार्थज्ञानकरणत्वलक्षणं प्रामाण्यं सम्भवत्येवेति कैश्चिदुक्तमपास्तम्; अनृक्सामसु तस्याप्यसम्भवात् ।

अत एवं वाच्यम्—सर्वत्र गामानयेत्यादौ संसर्गविषयकशाब्दबोधं प्रति यथा शब्दः करणं, पदार्थज्ञानमवान्तरव्यापारः तथा पदार्था एव करणम्, तज्ज्ञानमवान्तरव्यापारः । शब्दस्तु पदार्थज्ञानं प्रति करणत्वेनोपक्षीण इत्यपि मतान्तरमाचार्यैस्तर्कपादे

(१)पदार्थानां तु मूलत्वं युक्तं तद्भावभावतः'

---

१. श्लो. वा. अ. ७. श्लो. १११. पृ. ८७७.

इत्यादिनोपपादितम् । न च भूतभाविपदार्थानां नियतपूर्ववृत्तित्वाभावात्करणत्वानुपपत्तिः, भूतभाविपदार्थानां स्वरूपेणाऽविद्यमानानामपि ज्ञानविषयत्वेन सत्वाज्ज्ञाततायामिव शाब्दबोधं प्रत्यपि करणत्वोपपत्तेः ।

अत एवोक्तं न्यायसुधाकृता—'अतीतानागतयोरप्यतिक्रान्तदिवसादिगतसङ्ख्यादिवज्ज्ञाततायां करणत्वोपपत्ति'रिति । नैयायिकमते मौनिवाक्यस्थले शब्दस्याऽप्यविद्यमानत्वाच्च । अतश्च यथा ज्ञानविषयत्वेनैव शब्दस्य करणत्वोपपत्तिः, तथा मन्मतेऽप्युपपत्तिः । तेन पदार्थानामपि शाब्दप्रमितिकरणत्वात्सर्वमन्त्राणाञ्च स्वविनियोगविधौ प्रयोगविधौ च पदार्थत्वेनान्वयाद्धर्मविषयकशाब्दप्रमाकरणत्वोपपत्तेर्युक्तं प्रामाण्यम् ।

न चैवं व्रीह्यादीनामपि पदार्थविधया प्रामाण्यापत्तिः, इष्टापत्तेः । न च (१)'चोदनालक्षणोऽर्थो धर्म' इत्यस्मिन् सूत्रे धर्मे चोदनारूपस्य वेदशब्दस्यैव प्रामाण्यमिति नियमकरणात् व्रीह्याद्यर्थस्य प्रामाण्याङ्गीकारे च तद्भङ्गापत्तिरिति वाच्यम् । तत्रत्यचोदनाशब्दस्य (२)'चोदनेति क्रियायाः प्रवर्तकं वाक्यम्' (३)'चोदनाचोपदेशश्च विधिश्चैकार्थवाचिन' इति भाष्यवार्तिकस्वरसाद्विधिमात्रवचनत्वेन तस्मिन् सूत्रे ईदृशानियमाकरणात् । अत एव तत्सूत्रं न प्रथमाध्यायार्थप्रतिज्ञापरम्, अपि तु प्रथमपादव्युत्पाद्यविधिप्रामाण्यप्रतिज्ञापरमेवेति(४) स्मृत्यधिकरणे वक्ष्यामः। नियमोऽपि तेनेदृश एव क्रियते–धर्मे एव प्रमाणं चोदनेति । यद्यपि च चोदनैव प्रमाणमित्यपि नियमः क्रियेत, तथाऽपि प्राधान्येन सैव प्रमाणमित्येवंपरो द्रष्टव्यः । न त्वेतावताऽन्येषां

---

१. जै. सू. १. १. २. २. शा. भा. पृ. ३. पं. ९.
३. श्लो. वा. अ. ५. श्लो. ११. पृ. २११. ४. पू. मी. १. ३. १.

प्रामाण्यनिषेधः । तस्मात्सिद्धं पदार्थविधया सर्वमन्त्राणां प्रामाण्यमिति ।

अस्तु वा मन्त्राणां प्रमाजनकत्वाभावेऽप्युक्तविधया प्रयोजनवत्त्वमात्रेणैवोपयोगो धर्मे, तावतैवाध्ययनविधेरुपपत्तेरुपयोगविशेषविचार एव मन्त्राधिकरणशरीरम् । अर्थवादोपयोगप्रसङ्गाच्चाध्यायासङ्गतोऽप्ययर्थो नासङ्गत इति द्रष्टव्यम् । साङ्गवेदोपयोग एव वा जिज्ञासितत्वादध्यायार्थ इत्यपि सुवचम् । उपयोगोऽपि मन्त्राणां प्रायशो धर्म एव, नत्वधर्म इत्यपि च ध्येयम् ।

सूत्रं तु—यथैव लोके वाक्यस्य वाक्यार्थप्रमापकत्वं दृष्टं, तथा तन्मन्त्रेष्वप्यविशिष्टमिति व्याख्येयम् ।

यत्तु लिङ्गादेव विनियोगोपपत्तौ पुनः क्वचित्तद्विषये विनियोजकशास्त्रवैयर्थ्यमिति तन्न; (१)तत्र शास्त्रस्य मन्त्रविनियोजकत्वानभ्युपगमात् ॥ ४२ ॥

नन्तु तर्हि(२) "तां चतुर्भिरादत्त" इत्यत्रादानस्यार्थप्राप्तत्वात्, मन्त्राणां च तत्र लिङ्गादेव प्राप्तेः, सङ्ख्यायाश्चादाने मन्त्रे वा विधातुमशक्यत्वस्य (३)पूर्वमेवोक्तत्वात्, विधेयाभावेन पुनश्श्रवणानर्थक्यमिति चेत्—

गुणार्था वा पुनश्श्रुतिः ॥ १-२-४३ ॥

श्रुतार्थानुपपत्तिरूपस्याक्षेपस्य श्रुतिकल्पनाधीनप्रामाण्यस्य लिङ्गस्य वा प्रत्यक्षश्रुत्यपेक्षया मन्थरप्रवृत्तित्वात्, ततः पूर्वमेव प्रत्यक्षश्रुत्या मन्त्रसङ्ख्योभयविशिष्टादानविधानोत्तरं(४)अरुणैकहायनीन्यायेन मन्त्रसङ्ख्ययोः पार्ष्ठिकान्वयोपपत्तावर्थात्स-

---

१. तत्रेति नास्ति. ख. पु. २. तै. सं. ५. १. १.

३. अस्मिन्नेवाधिकरणे 'तदर्थ' सूत्र इत्यर्थः ४. पू. मी. ३. १. ६.

मुच्चयसिद्धेः एतद्विध्यभावे(१)चाक्षेपमन्त्रालिङ्गाभ्यामादानम-न्त्रयोः प्राप्तिसम्भवे तद्विषये विधिप्रवृत्तिफल आलोच्यमानेऽन-न्यलभ्यसङ्ख्याविधानार्थं तच्छ्रवणमिति फलावधारणात् वस्तुतो विशिष्टविधिरूपत्वेऽपि फलतो गुणविधानार्था पुन-श्श्रुतिः। न चात्र "चतुर्भि" रिति तृतीयया चतुर्णामपि म-न्त्राणां करणमन्त्रत्वावगतेराद्यमन्त्रत्रयजन्यस्मृतेश्च नष्टत्वेना-न्तिममन्त्रोच्चारणानन्तरक्रियमाणक्रियां प्रति करणत्वानुपपत्तिः। (२)"तुषपक्वा भवन्ती"त्यादौ परम्परयाऽपि करणत्वस्य बहुशो दृष्टत्वेनाऽऽद्यानां त्रयाणां संस्कारद्वाराऽपि करणत्वोपपत्तेः ॥४३॥

परिसङ्ख्या ॥ १-२-४४ ॥

"इमामगृभ्णन्" नित्यादेश्च परिसङ्ख्यार्थत्वेन न वैयर्थ्यम्। न च परिसङ्ख्यायां(३) त्रैदोष्यं, अप्राप्तपरिसङ्ख्याङ्गीकारात्। तथाहि—यावल्लिङ्गेन श्रुतिं कल्पयित्वा मन्त्रस्य रशनाद्दयादा-नाङ्गत्वमवगम्यते, तावदश्वाभिधान्यङ्गत्वेन प्रत्यक्षया श्रुत्या म-न्त्रस्य विनियोगान्न तावत्स्वार्थस्य विधेयत्वहानिः; अश्वाभि-धान्यङ्गत्वस्य प्राग्वचनादस्मादप्राप्तेः। अत एव गर्दभाभिधान्य-ङ्गत्वनिवृत्तिरूपपरार्थस्य विधेयत्वं न कल्प्यम्, तस्याः प्रापकप्र-माणाभावादेव सिद्धेः। अत एव प्राप्तयभावान्न प्राप्तबाधोऽपि। अतोऽत्राश्वाभिधान्युद्देशेनैव मन्त्रो विधीयते। आदानं त्वर्थप्रा-प्तमनूद्यते। अतश्च पूर्ववद्विधिप्रवृत्तेः फल आलोच्यमाने लिङ्ग-कल्प्यश्रुतिप्रतिबन्धद्वारा गर्दभरशनानिवृत्तेः फलत्वकल्पनात् फलतः परिसङ्ख्येति भाष्यकाराभिप्रायः।

---

१. भावेऽपि चेति. ख. पु. २. तै. सं. ५. २. ४. निर्ऋतिदेवताकाः तिस्र इष्टकास्तुषैः पक्वा भवेयुरित्यर्थः। ३. त्रैदोष्यापत्तिरिति. ख. पु.

वार्तिककारास्तु-याव(१) दादानमपि प्राप्यते तावत्प्रत्यक्षया श्रुत्या मन्त्रविशिष्टादानस्यैवाश्वाभिधान्यङ्गत्वेन विध्युपपत्तौ न धातुपारार्थ्यम् । कारकयोश्च मन्त्राश्वाभिधानीरूपयोरन्योन्यसम्बन्धो युक्तः । न च विशिष्टविधौ षष्ठविधिप्रकारापत्तेर्भाष्यकाररीत्या चतुर्थविधिप्रका(२)राश्रयणमेव युक्तमिति वाच्यम् । आक्षेपतोऽपि पूर्वं शीघ्रप्रवृत्तिकस्याऽक्षेपप्रतीक्षायां प्रमाणाभावेन तस्यामवस्थायामादानस्य प्राप्त्यभावेन विशिष्टविधित्वोपपत्तेः अन्यफलकत्वेनाऽस्य विशिष्टविधेर्दोषत्वाभावाच्च । अतो मन्त्रविशिष्टादानस्याश्वाभिधानीसंस्कारार्थत्वेन विधानाद्गर्दभाभिधान्यादानेऽप्राप्ते त्रैदोष्याप्रसङ्गात् वस्तुतोऽपूर्वविधित्वेऽपि पूर्ववत् फलतः परिसङ्ख्यात्वव्यपदेशासिद्धिः। अत एव सर्वत्रापूर्वविधित्वेऽपि यत्रैवाप्राप्तप्रापणं विधिप्रवृत्तेः फलं स एवापूर्वविधिशब्देन व्यपदिश्यते । यत्र त्वप्राप्तांशपूरणं तस्याः फलं स नियमविधिपदेना(३)भिधीयते ।

अत एव "व्रीहीनवहन्ती" त्यत्र यावदर्थाक्षेपात्पुरोडाशनिष्पत्त्यर्थं वितुषीभावजनकत्वेन विदलनादिसाधारण्येनावघातः पक्षे प्राप्यते, तावत्पूर्वमेव प्रत्यक्षया श्रुत्याऽवघाते विधीयमाने न तत्प्राप्तिरेव तत्र विधिप्रवृत्तेः फलम्। एतद्विध्यभावेऽर्थाक्षेपादेवावघातस्य प्राप्तिसम्भवात् । किन्तु यथाऽवघातोऽर्थाक्षेपात्प्राप्यते, तथा विदलनादिकमपि विकल्पेन । अतश्च विदलनादिप्राप्तिपक्षेऽवघातस्याऽप्राप्तत्वात् तदप्राप्तांश(४)प्रापणरूपो नियम एव विधेः फलम् । न च विदलनादिनिवृत्तिरेव विधेः फलं किं न स्यादिति वाच्यम् ? अप्राप्तांशप्रापणरूपस्य नियमस्याक-

१. यावदर्थादा इति. क. पु. २. राङ्गीकरणमिति. क. ख. पु.
३. अभिधीयत इति नास्ति. ख. क. पु. ४. पूरण इति. क.ख. पु.

रणे उपायान्तराक्षेपस्य निराकर्तुमशक्यत्वात् । करणे चार्थादेवान्यनिवृत्तेस्सिद्ध्युपपत्तेः फलत्वायोगात्, नियमस्य विधेयावघातगतत्वेन प्रत्यासन्नत्वाच्च ।

यत्र तु प्रत्यक्षविध्यभावे द्वयोश्शेषयोरेकस्मिन् शेषिणि शेषिद्वये वैकस्य शेषस्य नियता प्राप्तिर्दुर्बलप्रमाणेन सम्भाव्यते, यथा गृहमेधीये आज्यभागप्रयाजयोरतिदेशेन, प्रकृतमन्त्रस्य वाऽश्वगर्दभरशनादानयोर्लिङ्गेन, तत्र प्रत्यक्षविधेः (१)प्रवृत्तत्वात् । वस्तुतोऽपूर्वविधित्वेऽपि(२) "आज्यभागौ यजती" त्यनेन विहिताभ्यां क्लृप्तोपकाराभ्यामाज्यभागाभ्यामेव गृहमेधीयाकाङ्क्षानिवृत्तेरतिदेशाकल्पनात् फलतः प्रयाजादिशेषान्तरनिवृत्तिः ।

"इमामगृभ्णन्" नित्यस्य च प्रत्यक्षश्रुत्याऽश्वरशनादान एव विनियुक्तस्य निराकाङ्क्षत्वेन लैङ्गिकश्रुत्यकल्पनादर्थाद्गर्दभाभिधानीरूपशेष्यन्तरानिवृत्तिः । अत्र हि विधेयस्य नियतप्राप्तत्वान्नै-(३)तत्प्राप्तिर्नियमो वा फलम्, अपित्वन्यनिवृत्तिरेवाऽगत्या फलत्वेनाऽऽश्रीयते । अतः फलतः परिसङ्ख्याङ्गीकरणान्न त्रैदोष्यमित्याहुः ।

यत्र तु प्रापकप्रमाणोत्तरं शास्त्रप्रवृत्तिः यथा(४)"पञ्च पञ्चनखा भक्ष्या" इत्यादौ, तत्र त्रैदोष्यम् । तत्र भक्षणस्य रागप्राप्तत्वात्, ततः (५)पूर्वमेव विधाने फलकल्पनापत्तेः, अभक्ष्यप्रक्रमाच्चाविधेयत्वात् स्वार्थहानिः । पञ्चातिरिक्तपञ्चनखभक्षणस्यापि रागप्राप्तत्वान्निवृत्तेश्शास्त्रमन्तरेणासिद्धेः(६) विधेयत्वकल्पना । अत एव प्राप्तबाधोऽपि । प्रापकप्रमाणोत्तरं प्रवृत्ता-

१. पूर्वप्र. इति. क. ख. पु.
२. मै. सं. १. १०. १५.
३. न तदिति क. पु.
४. वाल्मी. रा. कि. १७. ३९.
५. पूर्वमेव चेति क. ख. पु.
६. विधिविधेयत्व इति. ख. पु.

वपि च यत्र नञादिश्रवणमेवकारो वा, तत्र प्राप्तपरिसङ्ख्यायामपि स्वार्थहानिपरार्थकल्पनयोरभावान्न दोषः । यथा (१)"नाऽनृतं वदेत्" "अत्र ह्येवाऽऽवपन्ती" त्यादौ ।

यत्तु न्यायसुधायामेवकारस्थले श्रौतो नियम इत्युक्तम्, तत् 'सत्यमेव वदे' दित्यादौ सत्यवदनस्य नियतप्राप्त्यभावादेवकारस्याऽयोगव्यावृत्त्य(२)भिप्रायेण ।

यत्र तु नियता कर्तव्यस्य प्राप्तिस्तत्रायोगव्यावृत्त्यसम्भवादन्ययोगव्यावृत्त्यर्थकत्वमादाय श्रौतपरिसङ्ख्यात्वमावश्यकम् । अत एव विवृद्धस्तोमकेषु "एकविंशेनाऽतिरात्रेण प्रजाकामं याजयेयु" रित्यादिवाक्यविहितेषु क्रतुषु सङ्ख्यायाः पृथक्त्वनिवेशात् तत्सम्पत्तये अनियमेन सर्वस्तोत्रेषु साम्नामृचां चागमेनावापे प्राप्ते "त्रीणि ह वै यज्ञस्योदराणि गायत्री बृहत्यनुष्टुप्, अत्र ह्येवाऽऽवपन्ति, अत एवोद्वपन्ती" त्यनेन गायत्र्यादिष्वेवाऽऽवापो नान्यास्विति परिसङ्ख्या । अतश्च गायत्र्यादीनां पवमानेष्वेव सत्त्वात् तद्विषय एवाऽयमावापः, नान्यस्तोत्रेषु । सोऽपि च साम्नामेव न ऋचां, तासामृगधिकरणत्वस्यासम्भवात् । अतश्च तत्राऽऽगम्यमानसामाधारभूतगायत्र्यादीनामभ्यास एव । स्तोत्रान्तरेषु तु साम्नामपि नाऽऽवापः, किन्त्वभ्यासेनैव सङ्ख्यासम्पत्तिः

यद्यपि नाऽयं सामावापो बहिष्पवमाने सम्भवति, तत्र सामैकत्वस्य प्रत्यक्षशिष्टत्वात् । तथाऽपि माध्यन्दिनपवमानार्भवपवमानयोरेव गायत्र्यादिमत्त्वान्निविशते । बहिष्पवमाने त्वेकस्य साम्नोऽभ्यास एव । ऋचां तु सङ्ख्यायाः (३)पृथक्त्वनिवेशित्वात्तत्सम्पत्तये "पराग्बहिष्पवमानेन स्तुवत" इति पराक्छ-

१. तै. सं. २. ५. ५. २. वृत्त्यर्थकत्वाभीति. क. ख. पु.
३. पृथक्त्वेन निवेशीति. क. ख. पु.

त्ववाच्यानभ्यासविधानाच्चागम एव। स्तोत्रान्तरेषु तु यद्यपि सङ्ख्यासम्पत्तये न्यायेनाऽऽगम एव प्रसक्तः, तथाऽपि बहिष्पवमाने न्यायप्राप्तऋगागमप्राप्तिफलकानभ्यासपुनर्विधिः (१)स्तोत्रान्तरे तदागमपरिसङ्ख्यार्थस्सम्पद्यत इति तदृचामप्यभ्यास एव। तत्सिद्धं "अत्र ह्येवाऽऽवपन्ती" त्ययं स्तोत्रान्तरे सामागमपरिसङ्ख्यार्थ एवकार इति। एवं यत्र विवृद्धस्तोमक्रतुशेषत्वेनौपदेशिकं कौत्सादिसाम विहितम्, तत्र तस्य प्रतिप्रधानं गुणावृत्तिन्यायेन सर्वस्तोत्रेषु प्रकृतसामबाधेनापि निवेशस्य नियमेन प्राप्तत्वादत्र ह्येवावपन्तीत्ययं पवमानद्वयव्यतिरिक्तविषयपरिसङ्ख्यार्थ एव।

न च कौत्सादेः कण्वरथन्तरादिवत्स्वयोनिष्वेव गेयत्वप्राप्तेः प्राकृतगायत्र्यादिष्वप्राप्तत्वेन परिसङ्ख्यानुपपत्तिः, कण्वरथन्तरयोनेर्हि वैश्यस्तोम(२)प्रकरणपठितत्वेन तदङ्गत्वावगमात्प्राकृतऋगाधारत्वानुपपत्तिर्युक्ता। कौत्सादीनां त्वनारभ्याधीतत्वेन सत्यपि वचनेन क्रत्वङ्गत्वावगमे तदाधारभूताया योनेः प्रकरणपाठाभावेनाङ्गत्वानवगमात् प्राकृतऋगाधारत्वस्य(३)दशमे वक्ष्यमाणत्वात्। ये त्वविवृद्धस्तोमकाः क्रतवो यथा(४) "त्रिवृदग्निष्टुदग्निष्टोम" इत्यादयः तेषु सङ्ख्यानुरोधेन प्राकृतसर्वस्तोत्रेषु सर्वसामसु तदाधारभूतासु च ऋक्षु निवृत्तासु यत्तदङ्गत्वेनौपदेशिककौत्सादिसामाम्नातं तन्निवेशार्थमानियमेना(५)प्राकृतसामोद्वापे प्राप्ते 'अत एवोद्वपन्ती' त्यनेन गायत्र्यादिभ्य एवेति नियमकरणात्स एव परं श्रौतो नियमः, न तु 'अत्र ह्येवावपन्ती' त्ययम्, किन्तु श्रौतः परिसङ्ख्याविधिरेवेति सिद्धम्।

१, स्तोत्रान्तरागमेति. क. पु. २. प्रकरणे पाठेनेति. क. पु.
३. पू. मी. १०. ४. १०. ४. तां. ब्रा. १७. ६. १.
५. यतः कुतश्चित्प्रा. इति. क. ख. पु.

वस्तुतस्त्वेवकारस्यान्ययोग(१)व्यवच्छेदार्थकत्वेन श्रौतपरिसङ्ख्यारूपत्वे तस्या निषेधतुल्यतया(२) "न तौ पशौ करोती" तिवद्विकल्पापत्तेर्नेयं श्रौती परिसङ्ख्या, अपि तु यावन्न्यायेन सर्वत्र सामागमः प्राप्यते तावत्पूर्वमेव गायत्र्याधारकत्वेन विधीयते । अतश्चाप्राप्तविधिरेवायं परिसङ्ख्याफलको न तु श्रौती परिसङ्ख्या ।

यद्यपि च गायत्र्यादिषु सामावापविधौ कृते न स्तोत्रान्तरेषु तदाकाङ्क्षाशान्तिरिति प्रापकप्रमाणप्रतिबन्धाभावान्नाऽत्र फलतः परिसङ्ख्यात्वं शक्यते वक्तुम् । तथाऽप्यत्रावापविधौ कृते तत्प्रयोजनजिज्ञासायां प्रयोजनान्तरासम्भवेन गमकविधया स्तोत्रान्तरेष्वभ्यासाविधिकल्पनेन परिसङ्ख्याफलकत्वोपपत्तिः । अतश्चाऽऽवपन्ती(३)त्यत्र धात्वर्थविधिरपि सम्पद्यते । एवकारस्तु फलप्राप्तानुवादो न तु स्वार्थविधायक इति द्रष्टव्यम् । एवञ्च रागप्राप्त एवाऽर्थे यत्रैवकारस्य नञो वा श्रवणं तत्रैव श्रौती परिसङ्ख्या नाऽन्यत्र । अत एव श्रौतपरिसङ्ख्यायां 'नाऽनृतं वदे' दि(४)त्युदाहरणमुक्तं न्यायसुधाकृता । प्रकृते तु लैङ्गिकप्राप्तेः पूर्वं प्रत्यक्षश्रुतेः प्रवृत्तत्वात् फलतः परिसङ्ख्यैवेत्युक्तम् ।

यत्त्वश्वाभिधान्युद्देशेन मन्त्रविशिष्टादानविधानेऽप्यश्वाभिधानीस्वरूप आनर्थक्यादपूर्वसाधनलक्षणायामेकया प्रणाल्यैकापूर्वसाधनत्वाद्यवेष्विव गर्दभाभिधान्यामपि मन्त्रप्राप्तिरनिवार्येति, तन्न । "व्रीहीन्प्रोक्षती" त्यादौ व्रीहिपदेनाऽपूर्वसाधनत्वे लक्ष्यमाणे प्रकृतापूर्वसाधनत्वमेव लाघवाल्लक्ष्यते, न तु प्रकृतापूर्वसा-

---

१. व्यावृत्त्यर्थ इति. क. ख. पु.   २. काषी. ब्रा. ३. ५.

३. त्ययामिति क. पु.   ४. त्येवोदाहरणेति. ख. पु.

धनीभूतव्रीहित्वमपीति युक्ता यवेषु धर्मप्राप्तिः। प्रकृते त्वपूर्वसाधनत्वमात्रलक्षणायां लिङ्गकल्प्यश्रुत्यविशेषेण प्रत्यक्षश्रुतिवैयर्थ्यापत्तेरगत्या प्रकृतापूर्वसाधनीभूताऽश्वाभिधानीत्वलक्षणाश्रयणान्न गर्दभाभिधान्यां मन्त्रापत्तिः।

न चात्राऽपि सर्वस्य यजुर्वेदस्याऽऽध्वर्यवसमाख्यानाद्यजुर्वेदविहितपदार्थानामध्वर्युकर्तृकत्वावगतेः प्रत्यक्षश्रुत्याऽऽदानाविधाने च तदासिद्धेस्तत्सिध्यर्थमर्थप्राप्तादानविधानेन श्रुतेरर्थवत्त्वोपपत्तेरश्वाभिधानीत्वलक्षणायां प्रमाणाभावाद्गर्दभाभिधान्यां मन्त्रप्राप्तिरनिवार्येति वाच्यम्। रशनाबन्धनस्य प्रत्यक्षश्रुतिविहितत्वेनाध्वर्युकर्तृकत्वे सिद्धे बन्धनार्थादानस्यान्यकर्तृकत्वानुपपत्तेरध्वर्युकर्तृकत्वस्य विधिं विनैव सिद्धेः।

एतेन(१) 'यदि यजुष्टो यज्ञो आर्तिमियाद्धुव इति दक्षिणे' त्यस्यापि प्रायश्चित्तस्योपक्रमानुसारेण वेदधर्मत्वस्य(२)तृतीये व्यवस्थापयिष्यमाणत्वाद्विध्यभावे अविज्ञातप्रायश्चित्तापत्तेरतत्प्रायश्चित्तप्राप्त्यर्थो विधिरर्थवानिति परास्तम्। आदानविध्यभावेऽपि मन्त्रस्यैव यजुर्वेदपाठितत्वेन एतत्प्रायश्चित्तप्राप्त्युपपत्तेः। आदानभ्रेषे बन्धनभ्रेषस्यावश्यम्भावेन तन्निमित्तमेतत्प्रायश्चित्तस्योपपत्तेश्च। किञ्च यथा(३)"रथन्तरे प्रस्तूयमाने सम्मीलयेत्, बृहति प्रस्तूयमाने समुद्रं मनसा ध्याये" दित्यादौ प्रतिनियतनिर्देशान्यथानुपपत्त्याऽपूर्वसाधनीभुतरथन्तरत्वादिलक्षणापक्षस्याप्याश्रयणान्न धर्माणां साङ्कर्यमिति(४)वक्ष्यते, तथाऽत्रापि(५)"युञ्जाथां रासभं युवमिति गर्दभ" मित्येवं प्रतिनि-

१. श. ब्रा. ११. ५. ८. ६.
२ पू. मी. ३. ३. १.
३. तां. ब्रा. ७. ७. १५.
४. नवमाद्वितीयचतुर्दशे
५. तै. सं. ५. १. २.

यतानिर्देशान्यथानुपपत्त्याऽश्वाभिधानीत्वादेरेव लक्षणेति न मन्त्रसाङ्कर्यम् ।

न च तत्रत्यपस्वरमकारणं कण्वरथन्तरादौ बृहद्रथन्तरधर्मप्रसक्तिरूपमत्रास्ति, अश्वाभिधानीकार्यापन्नस्य विकृतावसिद्धेः । अतो बृहद्रथन्तरस्थल एव परं पृष्ठस्तोत्रजन्यापूर्वैक्येऽपि बृहद्रथन्तरसामाश्रयतत्प्रतिपाद्यगुणाभिधानजन्यापूर्वरूपावान्तरकार्यसाधनलक्षणाश्रयणात्प्रकृतौ (१)धर्मव्यवस्थोपपत्तेः । कण्वरथन्तरे च स्वाश्रयऋग्वाच्यगुणाभिधानस्य प्राकृतगुणाभिधानजन्यापूर्वार्थत्वस्यैव लाघवेन हिरण्यगर्भमन्त्रवत्कल्पनात्प्राकृतकार्यापन्नत्वेन तत्प्रयुक्तधर्मप्राप्त्युपपत्तिः । प्रकृते त्ववान्तरकार्यभेदाभावात्प्रतिनियतनिर्देशबलादश्वाभिधानीत्वलक्षणायामपि न किञ्चिद्बाधकमस्तीति युक्तेयं परिसङ्ख्या ।

अत्र च परिसङ्ख्यादिलक्षणेषु विधिरसायनोक्तदूषणाऽनवकाशार्थमेवं वक्तव्यम्—यत्र निषेधापरपर्याया निवृत्तिः शब्दतः फलतो वा शास्त्रतात्पर्यविषयीभूता, स परिसङ्ख्याविधिः । उक्तपरिसङ्ख्योदाहरणेषु लक्षणसमन्वयस्तु स्फुट एव । तत्र निषेधप्रतियोगी विधिविषयः भावरूपोऽभावरूपो वा(२)उपाधिर्यः कश्चिद्बोध्यः । तेनाऽनृतवदनगर्दभाभिधानीप्रयाजादीनां नाऽसङ्ग्रहः । न वाऽनेकाभावप्राप्तावेकाभावपरिसङ्ख्यायाः । अभावस्य परिसङ्ख्यायाश्च तत्र चान्यत्र च प्राप्तिरौत्सर्गिकी, न तु नियता । "नाऽनृतं वदे" दित्यादौ सत्यानृतयोरेकस्मिन्नर्थावबोधे पक्षप्राप्तत्वेन नियतप्राप्त्यभावात् । अत एव सा न लक्षणघटिका ।

---

१. धर्मव्यवस्थाया उप. इति. क. पु.

२. उपाधिरिति नास्ति ख. क. पु.

न चैवं "व्रीहीनवहन्ती" त्यादाववघाताभावव्यावृत्तेरपि तात्पर्यविषयत्वात्परिसङ्ख्यालक्षणस्याऽतिव्याप्तिः, यत्प्रतियोगिकाभावत्वं यस्य शास्त्रस्य तात्पर्यविषयतावच्छेदकतापर्याप्त्यधिकरणं, तस्य शास्त्रस्य तत्परिसङ्ख्याविधित्वमिति विवक्षितत्वात् । सर्वत्र हि परिसङ्ख्याविधौ परिसङ्ख्येयप्रतियोगिकाभाव एव तात्पर्यविषयीभूतः । नियमविधौ त्ववघाताभावाभावरूपो नियमः । अत एवाभावाभावत्वस्य तात्पर्यविषयतावच्छेदककोटिप्रविष्टत्वेऽपि पर्याप्त्यधिकरणत्वाभावान्नातिव्याप्तिः । अत एव शब्दतः फलतो वा पाक्षिकायोगव्यावृत्तिरूपो नियमो यस्य शास्त्रस्य तात्पर्यविषयीभूतस्स नियमविधिः । उक्तोदाहरणेषु लक्षणसमन्वयस्स्फुट एव । पाक्षिकायोगश्च तन्मात्रविध्यप्रवृत्तिनिबन्धनो विध्यन्तराप्रवृत्तिसहितैतद्विध्यप्रवृत्तिनिबन्धनश्चेत्यादिप्रकारेण बोध्यः । "व्रीहीनवहन्ती"त्यादौ "उत्तरेऽहन् द्विरात्रस्य गृह्यत" इत्यादौ चाऽऽद्यः । एतद्विध्यभावे आक्षेपेणाऽवघातस्याऽतिरात्रसंस्थाकाद्वितीयद्विरात्राऽहनि च षोडशिग्रहणस्यातिदेशेन पक्षप्राप्तत्वात् । "व्रीहिभिर्यजेते" त्यादौ द्वितीयः । यवविध्यभावसहितैतद्विध्यभावे व्रीहीणामाक्षेपेण पक्षप्राप्तत्वात् ।

न चैवं पाक्षिकायोगभेदेन लक्षणभेदात्परस्पराव्याप्त्यतिव्याप्तिप्रसङ्गेन विधिरसायनोक्तदूषणतादवस्थ्यं, विदलनाद्युपायान्तरप्रसक्तिप्रसञ्जितयत्प्रतियोगिकाभावकूटाभावत्वं यस्य शास्त्रस्य तात्पर्यविषयतावच्छेदकतापर्याप्त्यधिकरणं, तस्य तन्नियमविधित्वमिति विवक्षाङ्गीकारेण पाक्षिकत्वभेदस्य लक्षणकोटाविप्रवेशात् ।

वस्तुतस्तु अवघातत्वावच्छिन्नप्रतियोगिताकाभावाभावत्व-

मेवोक्त(१)लक्षणे प्रवेश्यत इति कूटाद्यप्रवेशादपि लाघवम् । तथा च यद्धर्मावच्छिन्नप्रतियोगिताकाभावाभावत्वं तादृशावच्छेदकतापर्याप्त्यधिकरणं तस्य तद्धर्मवन्नियमविधित्वमिति निर्गलितोऽर्थः । तावतैव च परिसङ्ख्याविधितोऽपि भेदसिद्धेर्न कूटादिप्रवेशस्यापि प्रयोजनम् ।

एवं च यद्धर्मावच्छिन्नप्रतियोगिताकाभावत्वं यस्य शास्त्रस्य तात्पर्यविषयतावच्छेदकतापर्याप्त्यधिकरणम्, तस्य शास्त्रस्य तद्धर्मवत्परिसङ्ख्याविधित्वम् । एवं च "व्रीहीनवहन्ती" त्यादौ यच्छब्देनाऽवघातत्वस्य ग्रहणे नियमविधित्वमेव । अवघाताभावत्वग्रहणे तु परिसङ्ख्याविधित्वाङ्गीकारेऽपि न क्षतिः । वक्ष्यमाणविधया साङ्कर्यस्यानिवार्यत्वात् ।

न चैवमपि "व्रीहीन्प्रोक्षती" त्याद्यपूर्वविधावपि प्रोक्षणाभावाभावस्य प्रोक्षणस्यैव तात्पर्यविषयत्वादतिव्याप्तिः । निषेधमुखप्रतीतिकतयाऽभावाभावस्याऽतिरिक्तस्य प्रतियोग्यात्मकत्वानङ्गीकारेणाऽपूर्वविधौ लाघवाच्छुतत्वाच्च प्रतियोगिन एव तात्पर्यविषयत्वाङ्गीकारेणाऽभावस्य तात्पर्यविषयत्वाभावात् । नियमविधौ तु प्रतियोगिनः प्राप्तत्वात्(२) सामान्याभावाभाव एव तात्पर्यविषयीभूतः । यदि तु सामान्याभावाभावोऽप्याक्षेपेण प्राप्त इत्याशङ्क्येत, तदा विदलनाद्युपायान्तरप्रसाक्तिप्रसाञ्जितसामान्याभावत्वावच्छिन्नप्रतियोगिताकाभावत्वं यस्य शास्त्रस्य तात्पर्यविषयतावच्छेदकतापर्याप्त्यधिकरणं, तस्य शास्त्रस्य तद्धर्मावच्छिन्ननियमविधित्वमित्यादिरूपेण बोध्यम् । न तु कूटप्रवेशः । सामान्याभावे ह्यवघाताकरणप्रसञ्जितत्ववद्विदलनकरण-

१. विधिलक्ष इति. ख. पु. २. स्वसामान्येति क. ख. पु.

प्रसञ्जितत्वमप्यस्तीति विशिष्टाभावप्रवेशा(१)न्न कूटप्रवेशः। तावतैव विदलनाद्युपायान्तरप्रसक्तिप्रसञ्जितावघाताभावकूटाभावस्य सिद्धेर्विदलनादिव्यावृत्तिसिद्धेश्च। यदि तु सामान्याभावे विदलनकरणप्रसञ्जितत्वे प्रमाणाभाव इति विभाव्यते; ततः पूर्वोक्तलक्षणमेव साधीयः। माऽस्तु वा नियमविधौ पर्याप्तिविवक्षा।

यत्तु दृष्टार्थत्वं नियमविधिलक्षणं कैश्चिदुक्तम्, तत् "उत्तरेऽहन् द्विरात्रस्य गृह्यत" इत्यादावव्याप्तत्वादुपेक्षितम्। षोडशिग्रहयागाभ्यासस्याऽदृष्टार्थत्वात्। एवं च नियमपरिसङ्ख्यातिरिक्तफलकविधित्वमपूर्वविधित्वमि(२)ति लक्षणम्। (३)एवं च यद्विषयको विधिरुक्तफलद्वयातिरिक्तफलतात्पर्यकः, तत्वं तदपूर्वविधित्वम्। लक्षणसमन्वयस्तु सर्वत्राऽप्यपूर्वविधौ सुधीभिरनुसन्धेयः। तच्च फलं "व्रीहीन्प्रोक्षती"त्यादौ विधेयमेव प्रोक्षणादि, "तमुक्थ्येने"त्यादौ गुणकामप्रवृत्त्यादिर्विधेयवचनाद्यन्यदिति प्रकारभेदेऽपि न काश्चिद्विरोधः। एतेषां चोपाधीनां क्वचिदुदाहरणे विषयभेदेन वा विषयैक्येन वा साङ्कर्येऽपि न कश्चिद्दोषः।

न ह्येवंविधलक्षणसाङ्कर्याङ्गीकारे दीक्षितदण्डादन्यो दण्डो मैत्रावरुणकर्तृके प्रैषानुवचने प्रसज्येतेत्यादिदूषणानां प्रसङ्गलेशोऽप्यस्ति। (४)"क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छती"त्यस्या(५)भावे दीक्षितदण्डस्य यजमानधारण एव विनियोगाल्लौकिकस्यैव दण्डस्य नियमविधिः, 'दण्डी'

१ न कूटप्रवेश इति नास्ति ख. पु

२. इति लक्षणमिति नास्ति. ख.पु. ३. तत्वञ्चेति क. पु.

४. तै. सं. ६. १.४. ५. दण्डीत्यस्य चोभयोर. इति ख. पु

त्यस्यैवाभावे च दीक्षितदण्डस्य मैत्रावरुणाय दत्तस्य प्रयोजनापेक्षायामालम्बनतया कार्यमात्रे समुच्चित्य प्राप्तौ दण्डीत्ययं प्रैषानुवचनातिरिक्तकार्यान्तरपरिसङ्ख्याविधिस्सम्पद्यते। ततश्च तदुभयाङ्गीकारे(१) लौकिकदण्डस्यापि ग्रहणापत्तिरिति हि (२)दूष-

१. तत्साङ्कर्याङ्गीकार इति क. ख. पु.

२. दूषणमिदं श्रीमदप्पय्यदीक्षितैर्विधिरसायने 'यद्येकानेकविध्यप्रसृतिमुखभव' इति दशमश्लोके 'दैक्षाद्न्योऽपि दण्डः प्रकृतिजुषि भवेत्प्रैषकार्ये प्रशास्तु' रित्यादिना दत्तम् । तस्याऽयं पिण्डीभूतोऽर्थः—ज्योतिष्टोमे दीक्षाप्रकरणे 'दण्डेन दीक्षयती' त्यनेन दीक्षाभिव्यञ्जकतया दीक्षितहस्ते दण्डदानं विहितम् । तत्र द्वितीयदिनकर्तव्यसोमक्रयणानन्तरं तस्यैव दण्डस्य मैत्रावरुणाय दानं विहितं 'क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छती'ति । तत्रैव च मैत्रावरुणकर्तृकेषु प्रैषानुवचनेषु दण्डवैशिष्ट्यमपि विहितं 'दण्डी प्रैषानन्वाहे'ति । तथा च दीक्षितेन दत्तं दण्डमवलम्ब्यैव तिष्ठन्मैत्रावरुणः अग्नीषोमीयपश्वादौ प्रैषानुवचनं करोतीति स्थितिः ।

सति चैवं तन्मात्रविध्यप्रवृत्तिदशायां विध्यन्तराप्रवृत्तिसहिततद्विध्यप्रवृत्तिदशायां वा या पाक्षिकी अप्राप्तिस्तादृशाऽप्राप्तांशपूरको नियमविधिरिति नियमविधिलक्षणमङ्गीकरणीयम् । अतश्चानियमेनैकानेकविध्यप्रवृत्ताविति विवक्षणे 'दण्डी प्रैषानन्वाह' इत्यत्र तन्मात्रविध्यप्रवृत्तिविवक्षायां 'क्रीते सोम' इति विधेस्सत्वात्तत्प्रापितस्य मैत्रावरुणदण्डस्य कार्यापेक्षायां सत्यां तत्कर्तृकप्रैषानुवचनवत्कार्यान्तरेष्वपि दण्डस्य समुच्चित्य प्राप्तिसंभवात्तादितरकार्यान्तरव्यावृत्तिरूपपरिसङ्ख्याविधित्वं 'दण्डी प्रैषानि' ति वाक्यस्य प्राप्नोति । 'क्रीते सोम' इति वाक्याप्रवृत्तिसहकृततद्विध्यप्रवृत्तिविवक्षणे तु 'दण्डेन दीक्षयती'ति विधिमात्रसत्वेन तत्प्रापितदीक्षितदण्डस्य आन्तं दीक्षितेनैव धारणीयत्वमापतेत् । ततश्च मैत्रावरुणस्य प्रैषानुवचनसमये आलम्बनापेक्षायामनियमेन यस्य कस्यचिदालम्बनप्राप्तौ दण्डस्यैवालम्बनत्वं विदधदयं नियमविधिस्संपद्यते । अतश्चैकस्मिन्नेव वाक्ये नियमपरिसङ्ख्याविधिलक्षणसाङ्कर्यमेकानेकप्रवृत्ति-

णम्; तच्च न युज्यते, तार्किकफलानेकत्वेऽपि वस्तुतः "क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छती" त्यनेन मैत्रावरुणार्थत्वेन विनियुक्तस्य(१)दीक्षितदण्डस्य प्रयोजनापेक्षायां 'दण्डी प्रैषानन्वाहे' त्यनेन कार्यविधानादन्यस्याऽप्रसक्तेः। एवमन्यत्राप्यूह्यम्। एतानि च लक्षणानि सुधीभिर्विधिरसायनोक्तोदाहरणेषु योज्यानि।

न चान्यत्र सुयोज्यत्वेऽपि(२) 'यदि सोमं न विन्देत् पूतीकानभिषुणुया' दित्यादौ सोमाभावे पूतीकानां मन्दसदृशतया प्राप्त्यभावेन तत्र पूतीकप्राप्तेरेव तात्पर्यविषयत्वात्, तदभावाभावस्य प्रोक्षण इव तात्पर्यविषयत्वे च प्रमाणाभावान्नियमविधित्वानुपपत्तिः, एतद्वचनस्य सुसदृशप्राप्तिन्यायप्रवृत्त्युत्तरप्रवृत्तौ प्रमाणाभावेन पूर्वप्रवृत्तस्याऽस्य पूतीकप्रापकत्वानुपपत्तेः।

यत्र तु(३) "हिरण्यगर्भस्समवर्तताऽग्र इत्याघारमाघारयती" त्यादौ हिरण्यगर्भप्रकाशकस्य मन्त्रस्य ऐन्द्राघारे कथमपि प्राप्त्यसम्भवः, तत्र सत्यपि क्लृप्तनियमादृष्टजनकत्वेनोत्तराघारे मन्त्रविधौ(४) 'औदुम्बरो यूपो भवती' तिवदपूर्वविधित्वेऽपि न क्षतिः।'सर्वे द्रव्यविधयो नियमविधय'इत्यादिवादस्तु(५) हीषा-

---

विवक्षणकृतमापद्यते। किञ्च द्वितीयपक्षे दैक्षे पशौ दीक्षितदण्डादन्यस्यैव लौकिकदण्डस्य प्राप्त्यापत्तिरिति।

१. दीक्षितेति नास्ति ख, पु, २. तां. ब्रा. ९. ५. ३.

३. अग्निचयनाङ्गभूतवायुदेवताकः पशुयागो विहितः। तदङ्गत्वेन प्रकृतित अतिदिष्टयोराघारयोर्द्वितीयाघारे मन्त्रोऽयं विहितः॥

४. तै. सं. २. १. ९.

५. 'सौभरमुक्थ्यानां ब्रह्मसाम भवती'ति वाक्यविहितसौभराख्यसामविशेषस्य वृष्ट्यादिफलोद्देशेन विधानं 'यो वृष्टिकामो योऽन्नाद्यकामो यस्स्वर्गकामस्स सौभरेण स्तुवीते'ति। तस्यैव च तत्तत्फल-

दीनां वृष्ट्यादिफलार्थत्वे अपूर्वविधित्वापत्तेरित्यादिव्यवहारा-द्दौत्सर्गिक एव । अत एव सर्वेष्वेव वाक्येषु विषयभेदेन विषयैकयेन वा क्रमेण यौगपद्येन वा अनेकफलतात्पर्यकत्वेऽपि क्वचित्केनचिद्व्यवहारो मूले नाऽनुपपन्नः । तद्यथा—प्रकृतौ 'स्रुवेणाऽऽघारमाघारयती' त्यत्रैवाऽप्राप्तहोमप्रापणमभ्युदयाशिरस्कत्वं, याजुर्वेदिकप्रायश्चित्तप्राप्तिरित्याद्यनेकफलतात्पर्यकत्वादपूर्वविधित्वं, पुनश्च तस्मिन्नेव विषये अध्वर्युकर्तृकत्वादिफलमादाय नियमविधित्वं, पुनश्च स्रुवविषये तदित्यनेकरूपता । न चैषां मध्ये एकस्यैव तात्पर्यविषयता नाऽन्येषां, अनुनिष्पन्नत्वादिति वाच्यम् । तात्पर्याभावे तदभावप्रयुक्तवैगुण्यानापत्तेः । अत एवाऽप्राप्तप्रापकविधावपि न तद्विधिजन्यबोधस्याऽऽवश्यकत्वं सर्वेषामिष्टम् । एवं वार्तिकोक्ते "व्रीहीन्प्रोक्षती" त्यत्रापि(१) 'अग्नये वो जुष्टं प्रोक्षामी' त्येतन्मन्त्रकल्प्यविधितः पूर्वप्रवृत्तेरप्राप्तप्रोक्षणप्रापकत्वं, तार्किकतत्प्राप्त्यालोचनोत्तरकालं त्वभ्युदयाशिरस्कत्वं, प्रायश्चित्तप्राप्तिरध्वर्युकर्तृकत्वं, चेत्यादिफलप्रापकत्वादनेकरूपता । 'व्रीहीनवहन्ती' त्यत्राप्याक्षेपतः पूर्वं(२) प्रवृत्ताऽवघातप्रापकत्वादपूर्वविधित्वं, तार्किकतत्प्राप्त्यालोचने तु तन्नियमफलकत्वं, तार्किकतन्मन्त्रवर्णकल्प्यावघातनियमप्राप्त्यालोचने त्वभ्युदयाशिरस्कत्वं, प्रायश्चित्तप्राप्तिं च(३) तद्विषयामङ्गीकृत्याऽपू-

साधनत्वेन विधीयमानस्य हीषादयो नियम्यन्ते 'हीषिति वृष्टिकामाय निधनं कुर्यादूर्गित्यन्नाद्यकामाय, ऊ इति स्वर्गकामाये'ति । वृष्टिसाधनीभूतसौभरे हीषिति निधनं पठेदिति तदर्थः । प्रस्तावोद्गीथप्रतिहारोपद्रवनिधनाख्यभागपञ्चकात्मनस्साम्नोऽन्तिमो भागो निधनमित्युच्यते ॥

१. तै. सं. १. १. ४. २. प्रवृत्तावप्राप्तावघातेति. क. ख. पु.

३. तात्पर्यविषयामङ्गीकृत्येति ख. पु.

र्वविधित्वं, अध्वर्युकर्तृकत्वाद्यादाय च नियमविधित्वमित्यादि तत्तद्विधिष्वनेकरूपत्वेऽपि क्वचित्केनचिद्रूपेण व्यवहार इति नाऽत्र रूपान्तरलक्षणातिप्रसङ्गोद्भावनं युक्तम् ।

वस्तुतस्तु 'अवरक्ष' इत्यवघातमन्त्रस्य नाऽवघाते स्फुटं लिङ्गमिति तेन नाऽवघातनियमप्राप्तिः, "अग्नये वो जुष्टं प्रोक्षामी" ति प्रोक्षणलिङ्गमन्त्रस्याऽप्याग्नेयाङ्गभूतदर्भादिसाधारण्यापत्तेर्व्रीहिमात्रविषयतया प्रोक्षणप्राप्त्यनुपपत्तेः "व्रीहीन्प्रोक्षती" त्ययं दर्भादिपरिसङ्ख्यार्थ इत्यपि शक्यते वक्तुमिति ध्येयम् ।

न चैवं प्रोक्षणावघातादिविधीनां यवादिपरिसङ्ख्याफलकत्वस्याप्यापत्तिः, सम्भावितेषु ह्यनेकेषु फलेषु यदेकमनेकं वा प्रामाणिकं फलं तत्रैव शास्त्रस्य तात्पर्यं, न तु प्रमाणबाधितेऽपि । प्रमाणबाधाऽबाधौ च तत्र तत्राऽधिकरणे स्फुटावेव । यत्रापि च न स्फुटौ तत्रापि स्वयमूह्यौ । यथाऽत्रैव यवादिपरिसङ्ख्यायाम् । व्रीहिपदेन ह्यपूर्वसाधनत्वमात्रमेव लाघवाल्लक्ष्यते, न तु तत्साधनीभूत(१) व्रीहित्वजातिरपि, गौरवात् । अतश्च गौरवपरास्तत्वान्न परिसङ्ख्याफलकत्वम् । (२)"इमामगृभ्णन्नि" त्यादौ(३) "युञ्जाथाँ रासभं युवमिति गर्दभ" मिति प्रतिनियतनिर्देशान्यथानुपपत्त्या गौरवाश्रयणेनाऽपि परिसङ्ख्याफलकत्वम् ।

न च लिङ्गादेव 'युञ्जाथामि'ति मन्त्रस्य गर्दभाङ्गत्वसिद्धेर्नाऽयं प्रतिनियतनिर्देश इति वाच्यम्, युवमिति पुरुषाश्वयोरुपादानेन लिङ्गसाधारण्यात् । अतः तत्राऽगत्याऽन्यपरिसङ्ख्याफलकत्वाङ्गीकारेऽपि न प्रकृते तदाश्रयणम् । अत एव यत्र परिसङ्ख्याङ्गीका-

---

१. व्रीहित्वमपीति ख. पु. २. तै. सं. ४. १. २.
३. तै. सं. ५. १. २.

हेऽपि न गौरवं, तत्र वाक्यस्याऽभ्युदयाशिरस्कत्वयाजुर्वेदिकप्राय-श्चित्तादिप्राप्तिरूपफलान्तरतात्पर्यकत्वेऽपि परिसङ्ख्याफलकत्वम्। यथा(१) 'आज्यभागौ यजती' त्यादौ। अत एव क्वचिदेव नियम-विधित्वसम्भवेऽपूर्वविधित्वानङ्गीकारः, यत्राऽपूर्वविधित्वं गौरव-पराहतम् । यथा हीषादौ व्यवस्थार्थत्वसम्भवे गुणफलसम्बन्ध-स्याऽदृष्टान्तरकल्पनापादकस्य, न तु सर्वत्र। "पुरोडाशं प्रथयती" त्यादावध्वर्युकर्तृकत्वनियमफलकत्वेऽपि याजुर्वेदिकप्रायश्चित्त-प्राप्तिफलकत्वेनाऽपूर्वविधित्वविस्रम्भावात् । अतस्सर्वत्रैव प्रा-यशः फलसाङ्कर्यसत्वेन मूले क्वचित्केनाचिद्व्यवहारस्यैच्छिकत्वा त्तत्रेतरलक्षणातिप्रसङ्गकथनं न युज्यते । अतश्चोक्तलक्षणानां तदुदाहरणानां च वार्तिकाद्युक्तानामनुपपत्त्यभावाद्विधिरसायनो-क्तलक्षणाक्षेप उदाहरहणाक्षेपश्च न सङ्गच्छते । आक्षेपाक्षेपप्रस-ङ्गेन न्यायशैथिल्यकरणन्तु तत्तदधिकरणप्रसङ्गेन तत्र तत्र प्राय-शो निरांकारिष्यत इति विधिरसायनोक्तदूषणानामनवकाशः॥४४॥

अर्थवादो वा ॥ १-२-४५ ॥

"उरु प्रथस्वेति पुरोडाशं प्रथयती" त्यत्र मन्त्रोपादानं "य-ज्ञपतिमेवे" त्यर्थवादालम्बनार्थम् । आलम्बनप्रकारश्च पूर्वमेव प्रदर्शितः ।

यत्तु प्रथनस्याप्यर्थप्राप्तत्वेनाऽविधेयत्वाद्विधिशेषत्वाभावेनाऽर्थ-वादत्वस्यैवानुपपत्तिरिति, तत्प्राप्तस्यापि प्रथनस्याऽध्वर्युकर्तृक-त्वार्थं विधानोपपत्तेः परिहर्तव्यम्। तस्माद्यज्ञपतिप्रथनफलकत्वेन पुरोडाशप्रथनं स्तोतुं मन्त्रोपादानम्। न च यज्ञपातिप्रथनस्य पुरो-

---

१. चातुर्मास्यान्तर्गतगृहमेधीयेष्टिसन्निधिपठितेति ।

डाशप्रथनफलकत्वज्ञापनार्थत्वेन रात्रिसत्रवन्मन्त्रोपादानं विनाऽप्यर्थवादोपपत्तिः, पुरोडाशप्रथनस्य पुरोडाशसंस्कारार्थत्वेन परार्थत्वादर्थवादस्य फलकल्पकत्वानुपपत्तेः ।

न च सूक्तवाकन्यायेन मन्त्रादेव फलकल्पनोपपत्तेः मन्त्रोपादानं विनाऽप्यर्थवादोपपत्तिः, वैषम्यात् । तृतीयया इतिकरणेन वा यत्र मन्त्रविनियोगस्तत्र सकलस्य मन्त्रस्य क्रियां प्रति करणत्वावगमादुत्सर्गतस्तावदयमर्थः प्रतीयते—सकलेनापि क्रियैव प्रकाशनीयेति । तदसम्भवे चाऽवगतक्रियासम्बद्धद्रव्यादि, तस्याऽप्यसम्भवे स्वार्थस्य क्रियासम्बन्धकल्पनं, तस्याप्यसंभवे च समवेतमर्थं स्तोतुं स्वार्थस्य तदुपसर्जनत्वकल्पनमिति । तद्यथा "सूक्तवाकेन प्रस्तरं प्रहरती" त्यत्र सकलस्य सूक्तवाकस्य तृतीयावगतकरणतान्यथानुपपत्त्या प्रहरणक्रियाप्रकाशकत्वावगतावपि तदसम्भवेऽवगतक्रिया(१) सम्बद्धं प्रस्तराख्यं द्रव्यं "यदनेन हविषे" त्यादिपदैः प्रकाश्यते, अवशिष्टैश्चाग्न्यादिपदैः(२) आयुरादिपदैश्च स्वार्थस्य फलदेवतात्वेन सम्बन्धकल्पनं, तस्याप्यसम्भवे "इदं द्यावे" त्यादिपदानां समवेतद्रव्यदेवताफलस्तावकत्वमात्रकल्पनमिति । एवं "ममाऽग्ने वर्चो विहवेष्वस्त्विति पूर्वमग्निं परिगृह्णाती" त्यादावपीतिकरणविनियुक्तेऽप्यन्वाधानस्य वर्चःप्रभृत्यानुषङ्गिकफलकल्पनं द्रष्टव्यम् ।

यत्रापि क्रमादिविनियुक्तो मन्त्रः, यथा उपांशुयाजादौ याज्यानुवाक्यारूपः, तत्राऽपि क्रियाप्रकाशनासम्भवे स्वार्थस्य देवतात्वादिना क्रियासम्बन्धकल्पनमिष्टमेव । तत्र त्वेतावान्विशेषः—यत्क्रमादिविनियोज्ये यागापेक्षितं देवताद्येव क्रि-

---

१. सम्बन्धि प्रस्तरेति. ख. पु. । २. आयुरादिपदैरिति नास्ति. ख.पु.

थासम्बन्धित्वेन कल्प्यते न तु सर्वमन्त्रप्रतिपाद्यम् । एकसम्बन्ध-कल्पनेनाऽपि मन्त्रस्य प्रयोजनाकाङ्क्षानिवृत्तेः, तृतीयादिविनियुक्तवत्सकलमन्त्रकरणत्वानवगमाच्च । प्रकृते तु "उरु प्रथस्वे"-त्यस्य लिङ्गविनियुक्तत्वात्प्रथनक्रियाप्रकाशकत्वेनैव मन्त्रनैराकाङ्क्ष्योपपत्तेस्सूक्तवाकादिवत्सकलस्य करणत्वानवगमेन फलकल्पकत्वानुपपत्तिः ।

न चैवं "ममाग्ने वर्च" इत्यस्यापि इन्धाना इति लिङ्गादेव विनियोगात्फलकल्पकत्वानापत्तिः, इन्धाना इति लिङ्गादग्निधारणार्थत्वावगमेऽप्याद्याग्निधारणमात्रार्थत्वस्य "इति पूर्वमग्निं परिगृह्णाती"ति विधिं विनाऽसिद्धेरितिकरणाविनियुक्तत्वेन फलकल्पकत्वोपपत्तेः । न हि(१) पूर्वमिति पदं पूर्वाग्निरूपाहवनीयपरं, गार्हपत्येन्धनेऽस्य विनियोगात् । तत्त्वेऽपि वा(२) इतिकरणविनियुक्तत्वात्फलकल्पकत्वे न किञ्चिद्बाधकम् । प्रकृते तु लिङ्गविनियुक्तत्वान्न प्रथनफलत्वं यज्ञपतिप्रथनस्य कल्पनीयम् , किन्तु प्रथनफलानुवादकत्वमेव "आयुर्दा अग्ने" इत्यादिव"दुरु ते यज्ञपतिः प्रथता" मित्यस्य द्रष्टव्यम् । तस्मान्मान्त्रवर्णिकफलकल्पनानुपपत्तेरर्थवादालम्बनार्थमुक्तविधया मन्त्रोपादानमर्थवदिति सिद्धम् । यद्यपि च मन्त्रोपादानाभावेऽपि लैङ्गिकविनियोगेन मन्त्रस्य प्राप्तत्वात्तावतैव स्वाभिमतस्तुत्यालम्बनासिद्धिः, तथापि स्पष्टीकरणार्थं मन्त्रोपादानम् ॥ ४९ ॥

---

१. पूर्वपदमिति क. ख. पु. २. इतिकरणविनियुक्तत्वानपगमेन फलकल्पकत्वोपपत्तेश्चेति क. ख. पु.

अविरुद्धं परम् ॥ १-२-४६ ॥

यत्तु नियतक्रमाम्नानं, तदर्थपरत्वे सति नियमादृष्टकल्पनयाऽप्यविरुद्धम् । आवश्यकी च क्रमनियमाऽदृष्टकल्पना पूर्वपक्षिणोऽपि । क्रमान्यत्वेऽपि (१)मन्त्रोच्चारणे विशेषाऽनवगमेनोच्चारणादेवाऽदृष्टोत्पत्तौ बाधकाभावात् । प्रयाजादिक्रमवदुच्चारणक्रमस्याप्यदृष्टार्थत्वावश्यम्भावात् ॥ ४६ ॥

संप्रैषे कर्मगर्हानुपालम्भस्संस्कारत्वात् ॥ १-२-४७ ॥

या च "अग्नीदग्नीन्विहरे" ति संप्रैषे बुद्धबोधनासम्भवादभिधानरूपकर्मगर्हाऽभिहिता, सा स्वाध्यायकालीनज्ञानस्य क्षणिकत्वेन नष्टत्वात्स्मरणाख्यसंस्काररूपबोधसम्भवेन नोपालम्भः । प्रैषनियमाच्च नोपायान्तरस्य पूर्वपदार्थसमाप्त्यादेस्स्मारकत्वम् । न चैवं "विभूरसी" त्यादिमन्त्रान्तरस्याऽपि विहरणाङ्गत्वेनाम्नानात्प्रैषानर्थक्यं, मन्त्रद्वयाम्नानबलात्स्मृतिदार्ढ्यहेतुत्वेन प्रैषस्य वा साङ्गाग्निविहरणभावनास्मारकत्वा "द्विभूरसी" त्यादेश्चाग्निविहरणमात्रस्मारकत्वादग्निविहरणाङ्गभूतमन्त्रस्मारकत्वेनैव प्रैषार्थवत्त्वोपपत्तेः ॥ ४७ ॥

अभिधानेऽर्थवादः ॥ १-२-४८ ॥

(२)"चत्वारि शृङ्गे" त्यस्य कर्मसमवेतार्थप्रकाशनार्थं चतस्रो होत्राः, त्रीणि सवनानि, द्वे पत्नीयजमानौ,(३) सप्त छन्दां-

---

१. मन्त्राक्षरोच्चारणेति क. पु. २. ऋ. सं. ३. ८. १०

३. गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगतीरूपाणि सप्त छन्दांसि ।

६४ व्याप्तिपञ्चकरहस्यम् सिंहव्याघ्रलक्षणरहस्यं च । श्रीमथुरानाथतर्कवागीशकृतम् । न्यायाचार्य पं० शिवदत्तमिश्र विरचित गंगानिर्झरिणीव्याख्यया टिप्पण्यादिर्विभूषितं च । [न्या०-वि० ८] रु० ०-१२

६५ सिद्धान्तबिन्दुः । श्रीमधुसूदनसरस्वती विरचितः । श्रीभगवान्शङ्कराचार्य विरचित दशश्लोकव्याख्यारूपः श्रीगौड ब्रह्मानन्दविरचित न्यायरत्नावलीनारायणतीर्थ विरचित लघुव्याख्या टिप्पणीसहितः । [वेदान्त वि० ८] रु० ४—०

६६ अन्त्यकर्मदीपकः आशौचकालनिर्णयसहितः । प्रेतकर्मब्रह्मीभूतयति कर्मनिरूपणात्मकः महामहोपाध्याय पं० श्री नित्यानन्दपन्तपर्वतीय विरचितः । [कर्मकाण्ड वि० ६] रु० १—८

६७ सांख्यदर्शनम् । श्रीमद्विज्ञानभि

२—०

६८ अनेकार्थसङ्ग्रहो नाम कोशः

२—०

६९ शिशुपालवधम् । श्रीमन्माघकवि
षविव्याख्यया महामहोपाध्याय
समेतम् । सजिल्द ग्लेज कागज । स । ३—०

६९ ,, ,, २—४

७० जागदीशीपञ्चलक्षणी सिंहव्याः
रकृतम् । न्यायाचार्य पं० शिवदत्त
टिप्पण्यादि विभूषितं च । ०—८

७१ ब्रह्मसूत्रशाङ्करभाष्यम् । चतुःसू
श्रीगोबिन्दानन्द प्रणीतया रत्नप्रभया
एषो ग्रन्थः भागद्वये पूर्णो भविष्यति
द्वितीयाध्यायस्य द्वितीयपादान्तमस्मा
शीघ्रमेव मुद्रयित्वा प्रकाशयिष्यते) । प्रथमभागः (नविभाग ९) रु० २—८

७२-१-सिद्धान्तशिरोमणिः । श्रीभास्कराचार्य विरचित । गणिताध्यायः वासनाभाष्य सहितः ज्योतिषाचार्य म० म० श्रीबापूदेवशास्त्रिकृतटिप्पणी सहितः । [ज्यो० वि० ४] रु० २—०

७२-२-सिद्धान्तशिरोमणिः । ,, ,, ,,
गोलाध्यायः वासनाभाष्य सहितः । ज्योतिषाचार्य म० म० श्रीबापूदेवशास्त्र कृत टिप्पणी सहितः । [ज्यो० वि० ४] रु० २—०

७३ काकचण्डीश्वरकल्पतन्त्रम् । पण्डित रामकृष्ण शर्म्मणा सम्पादितम् । पण्डित बटुकनाथ शर्म्मा एम. ए. साहित्योपाध्याय इत्येतेन लिखितया प्रस्तावनया सनाथीकृतम् । [आयुर्वेद शास्त्रविभागे १] रु० ०—८

७४ किरातार्जुनीयम् । श्रीमत्कविकुलचूडामणिभारविविरचितम् मल्लिनाथसूरिकृतया घण्टापथसमाख्यव्याख्यया तथा पं० श्रीगङ्गाधरशर्मणा कृतया सुधाऽऽख्यव्याख्यया समलङ्कृतम् । [सर्गत्रयमात्रम्] । [काव्य वि० १०] रु० ०—१२

७५ चन्द्रालोकः । पीयूषवर्षश्रीजयदेवकवि प्रणीतः । श्रीमत्पद्मनाभमिश्रापराभिधान प्रद्योतनभट्टाचार्य विरचितया चन्द्रालोकप्रकाशापराख्य 'शरदागम' टीकया सङ्कलितः । साहित्याचार्येण खिस्ते इत्युपाख्यनारायणशास्त्रिणा भूमिकादिभिः सम्भूष्य सम्पादितः । [अलङ्कार वि० ३] रु० ०—१०

७६ किरातार्जुनीयम् । श्रीमत्कविकुलचूडामणिभारविविरचितम् । मल्लिनाथ-
सूरिकृतया घण्टापथसमाख्यया तथा पं० श्रीकनकलालशर्मणा कृतया भावा-
र्थदीपिनीव्याख्यया समलङ्कृतम् । [सर्गत्रयमात्रम्] [काव्य वि० ११] रु० ०—६

७७ शक्तिवादः, श्रीगदाधरभट्टाचार्यप्रणीतः, पण्डितप्रवरश्रीहरिनाथतर्कसिद्धा-
न्तभट्टाचार्यविरचितविवृतिसहितः । [न्यायविभागे १०] रु० ३—०

७८ माथुरीपञ्चलक्षणी । पं० श्रीउमानाथाज्र्यालकृतव्याख्या सहिता तथा
माथुरीसिंहव्याघ्रलक्षणम् । पं० श्रीहरिरामशुक्ल विरचितया व्याख्यया
सहितं तथा पं० श्रीहरिहरशास्त्रि सङ्कलित माथुरीपञ्चलक्षणी कोडपत्रेण
च । [न्याय वि० ११] रु० ०—६

७९ रसाध्यायः । टीकया संवलितः । [आयुर्वेदशास्त्र वि० २] रु० ०—१०

८० पाणिनिव्याकरणे वादरत्नम् । न्यायव्य ...णाचार्य मीमांसक शिरोमणि
पं० सूर्यनारायणशुक्लेन विरचितम् । (तत्र ... न्यास परिष्कारपरिशिष्टभेदेन
प्रकरण त्रयम् यत्र पञ्चन्यून सार्धशतसूत्र १४५ महताटोपेन न्याला-
विचारिताः तत्र प्रथमं प्रकरणं मुद्रितं द्वितीय प्रकरणमपि मुद्रित प्रायं शिघ्र-
मेव भवन्तं दृष्टि पथमधिगमिष्यतीति ।) प्रथमो भागः । (न्या० वि १०)रु०१—८

८१ गणितकौमुदी । (हिन्दीभाषाटीकासहिता) प्रथमापरीक्षापाठ्यनिर्द्धा-
रितगणितसंग्रहपुस्तकम् । [गणितविभागे १] रु० ०—६

८२ छन्दःकौमुदी । (हिन्दीभाषाटीकासहिता) प्रथमापरीक्षापाठ्यनिर्द्धा-
रितछन्दःसंग्रहपुस्तकम् । [छन्दोविभागे ३] रु० ०—६

८३ योगदर्शनम् । महर्षिप्रवरपतञ्जलिप्रणीतम् । तत्र (१) भोजवृत्तिः,
(२) भावागणेशवृत्तिः, (३) नागोजीभट्टवृत्तिः, (४) मणिप्रभा, (५) योग-
चन्द्रिका, (६) योगसुधाकराख्य टीका षट्कसमेतम् । [योग० विभागे१] रु० २—०

८४ रघुवंशमहाकाव्यम् । श्रीकालिदासविरचितम् । म० म० मल्लिनाथकृत
सञ्जीविनीटीका तथा पं० ब्रह्मशङ्करमिश्रकृत परीक्षोपयोगि सुधाऽऽख्यव्याख्यया
सहितः । १ से ४ सर्गः मू० १—४—० ५ से ९ सर्गः रु० १—८—० तथा ६ से १० सर्गः १—८—०

८५ योगदर्शनम् । पण्डित बलदेवमिश्रकृतया सटिप्पण्यायोगप्रदीपिकाख्य
विवृत्या समन्वितम् । (योग विभागे २) रु० १—०

८६ काव्यमीमांसा । राजशेखरविरचिता । साहित्याचार्य पण्डित श्रीनारायण-
शास्त्रीखिस्तेकृत काव्यमीमांसा-चन्द्रिका टीका सहिता । प्रथमाध्याय-
मारभ्य पञ्चमाध्यायपर्यन्ता प्रथमो भागः । (काव्य विभागे १३) रु० ०—८

८७ नागानन्दनाटकम् । श्रीहर्षदेवप्रणीतम् । काशीविश्वविद्यालयाध्यापकेन एम० ए०
साहित्याचार्येति पदवी विभूषितेन पण्डित श्री बलदेव उपाध्यायेन स्वप्रणीतया
भावार्थदीपिकाख्यया व्याख्या समलङ्कृत्य बृहत् भूमिका हिन्दीभाषा-
नुवादादिभिः सनाथीकृत्य सम्पादितम् । (नाटक विभागे १) रु० १—८

८८ मेघदुतकाव्यम् । महाकवि श्री कालीदासविरचितम् । मल्लिनाथकृत सञ्जीविन्या,
चारित्रवर्द्धनाचार्य विरचित चारित्रवर्द्धिन्या तथा साहित्याचार्य पं० श्रीनारायण-
शास्त्रि खिस्तेकृत भावप्रबोधिनी व्याख्या टिप्पण्या च सहितम् ।
(काव्य वि० १४) रु० ०—१०

सर्वविधपुस्तकप्राप्तिस्थानम्—
चौखम्बा संस्कृत सीरिज आफिस,
विद्याविलास प्रेस, गोपालमन्दिर के उत्तर फाटक,
बनारस सिटी ।